॥ अक्षरतंत्रम् ॥

॥ वेदाङ्गम् ॥

॥ महामुनिना आपिशलिना प्रोक्तम् ॥

सामगाचार्येण सामश्रमीतिलब्धोपनामकेन

श्रीसत्यव्रतभट्टाचार्येण

हस्तिपूरणेन बोधोपयोगिता मानीय प्रकाशितम् ।

१८११ शकाब्दीये भाद्रपदे

कलिकाता—सत्ययन्त्रे

[८५नं० आमहार्ष्ट ष्ट्रीट्]

तदादेशेनैवात्र भारते एव प्रथमं मुद्रितम् ।

॥ अथाक्षरतन्त्रम् ॥

(व्याकरणम्)

ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः ।
वृत्तिमक्षरतन्त्रस्य पापर्त्ति सत्य-सामगः ॥ १ ॥

अथाक्षरतन्त्रं व्याख्यास्यामः—किमिदमक्षरतन्त्रं नाम ? श्रूयन्ते खलु सामसु योन्यक्षरातिरिक्तान्यपि अक्षराणि, स्तोभ इति प्रसिद्धानि ; तदधीनाः स्वरादिविधय इह उपदिष्टाः ; अतएवायं ग्रन्थोऽभवदक्षरतन्त्रमितिनामभाक् ; यथा—ऋक्तन्त्रम्, सामतन्त्र मिति । सामतन्त्रे खलु साम्नां योनिगताएवाक्षरविकार-विश्लेषविकर्षणाभ्यासविरामादयश्चिन्तिताः ; इह तु साम्नां स्तोभगताः पातास्वरादयो वान्तपर्वादयश्च बोधिता इति भेदः ।

गीतिहेतुषु स्तोभस्यात्यन्तप्रसिद्धत्वात्तल्लक्षणं मीमांसाधिकरणमालायां नवमाध्यायस्य द्वितीयपादीयैकादशाधिकरणे चिन्तितं माधवाचार्येण । तथाहि—"स्तोभस्य लक्षणं नास्ति किं वास्ति न विवर्णता । आधिक्य मप्यतिव्याप्तं विशिष्टं लक्षणं भवेत् ॥" —इत्यादि ।

ग्रन्थ एष द्विप्रपाठकात्मकः ; प्रतिप्रपाठके त्रयोदश दशका विद्यन्ते ; दशसूत्रमयश्चैकैको दशकः ; तदेवमिह षष्ठ्यधिकद्विशत-सूत्राणि राजन्ते । तत्र प्रथमदशके अक्षरसञ्ज्ञादीन्युपदिष्टानि, द्वितीयादिषु षट्षु अक्षराणां प्रयोगविधींश्चोक्ता तत उत्तर मागन्थसमाप्तेः तदक्षरगतस्वरपर्वविधय एव सूचिताः ।

ग्रन्थोऽयं ऋक्तन्त्रप्रणेतुः शाकटायनस्य समकालिकेन महामुनिना भगवता आपिशलिना प्रोक्तः, सामतन्त्रन्तु गार्ग्येणेत्येव

वय मुपदिष्टाः प्रामाणिकैः ; ऐतिह्य मेवात्र मानम् । ततश्चैमानि सूत्राणि नूनं यास्कीयनिरुक्तात्, पाणिनीयव्याकरणतोऽपि बहु-प्राचीनानि; यास्कीये निरुक्ते, पाणिनीये व्याकरणे चासकृदेव शाकटायनगार्ग्ययोः स्मरणात् । एतच्चाक्षरतन्त्रं सामगाना मतिप्रयोजनीयम् ; किं बहुना एतदध्ययन मन्तरा सामगानां स्तोभविषयेऽभिकल्पत्वं नैव नश्यति ; पर महो कालप्रभावः ! एतादृशमहार्हग्रन्थरत्नस्याप्यद्य भारते द्वितीयपुस्तक मप्यस्ति नास्ति वेति महानेव संशयः ।

अस्यैका वृत्तिरनतिप्राचीनापि लेखकप्रमादादित एवाद्यन्त-दुष्टा दृश्यते, तामेव किञ्चिन्निवेशपरिहारादिभ्यः संस्कर्तुमिवाय मारम्भः शुभाय भवतु स्तोभविद्यार्थिनामिति ।

अथाक्षराश्रितानां पातादिस्वराणां वान्तादिपर्वणाञ्च सामसु बिबोधयिषया अक्षरविधानानि वक्तव्यान्येव — क्व कीदृश मक्षरं प्रयोक्तव्य मिति, तदुपदिदिक्षया चादौ अक्षरसञ्ज्ञा मेवैव माचार्यः सूत्रयति—

अन्नृगाद्यक्षरम् ॥ १

न ऋगादि, अनृगादि ; ऋग्लक्षणादिभिन्नं सामगतं वर्णादि अक्षरसंज्ञं * भवति । उदाहरणानि—आ उप् मोयि उम् इत्येवमादीनि । स्तोभ इति चास्यैव सञ्ज्ञान्तरम् ॥ १ ॥

अस्याद्यन्तयोः स्थितानि, अत उत्तरस्थानानि वा नव सूत्राणि विलुप्तानीवेति प्रतीयते ; दशकत्वस्थानन्यथासिद्धेः ; सञ्ज्ञादि-विषये वक्तव्यावशिष्टोपलाभाच्च । द्वितीयप्रपाठकस्य त्रयोदश-दशकात्मकत्वसाम्यादस्यापि हि तथात्वं सम्भवेदेवेति ॥

॥ इति प्रथमो दशकः ॥

* এই অক্ষর শব্দেরই অপভ্রংশ "আখর" ; কীর্ত্তনাদিতে অতিপ্রসিদ্ধ

औहोओहोइभ्यो हो। १

औ हो ओ हो३ एतेभ्यः परो हो स्तोभो भवति। हो इतास्यैव रूपान्तरं होइ इति स्मर्त्तस्य मिह सर्वत्रैव। औहो२। क्रेवथ इति प्रथमे। औ३(१ ३ २)हो३। औहो३। (३ २ २)परीतोषि तृतीये। सार्वाआइन्द्राग्नताखरेषु। यद्यकच्चवृत्रहत्रित्यत्र सार्वास्वरः। संहिते आइन्द्रास्वरः। तवत्यन्नर्यमित्यत्र शतास्वरः। (१ — १२)हौहो२ हौहो३। इन्धेराजादितीये। (२ २ २)ओहो३। कस्यनूनमिति द्वितीये। (१—)ओ२हो१३। कदावसो प्रथमे। (२ २ २)ओ३हो२हो३। सुष्वाणास द्वितीये। (१—)ओ२हो१। पुनानःसो द्वादशे। (१ १)हो३। होइ। नहिवश्च द्वितीये। प्रपुनानाय प्रथमे च। (१ १)हो होइ। अक्रान्त्समुद्रेत्यत्र ॥ १ ॥

वाचि। २

हो इत्यनुवर्तते। वागिति वाग्शब्दस्य संज्ञा प्राचामिति गम्यते; आर्षेयादिषु वाङ्निधनादिश्रुतेः। वा परे पूर्वः हो स्तोभो भवति। (३ ५)हो२३४वा६। त्वमिन्द्रयशा इति पञ्चमे। (१ ३ २)हो३वा। वृषाह्यसीति द्वितीये। (१ २)होवा। (१ २)ईया इत्यत्र रहस्ये। (४ ५)होवा। प्रसेनानीरिति प्रथमे। हौथाइन्द्राग्न्याजारास्वरेषु। प्रथमे पर्के हौषीस्वरः। संहिते आइन्द्रास्वरः। असाविदेवमिति द्वितीये आग्न्यास्वरः। जरावोध इति प्रथमे जारास्वरः ॥ २ ॥

औहो। ३

वा इत्यनुवर्तते। वा परे पूर्वः औहो स्तोभो भवति। औ(१ २ २)हो३ वा। रहस्ये प्रसोमदेव इति द्वितीये जङ्घास्वरः। अग्नि-

र्हत्राणीति द्वितीये जङ्घास्वरः । हादिश्च । *। वार्त्तिकमेतत् ; प्राचीनवृत्तितो लब्धं प्रयोजनीयञ्च । हापूर्वोऽपि औहो स्तोभो भवति । हाऔहोइ । प्रकेतुना द्वितीये ॥ ३ ॥

होई । ४

द्विवचनम् । वा इत्यनुवर्तते । वा परे पूर्वौ होइ होइ एतौ स्तोभौ भवतः । होइहोवा । इमउत्वाविचक्षत इत्यत्र । होइहोवा रहस्ये अग्निर्मूर्द्धायाम् । जगद्भ्रात इति पञ्चमे च ॥ ४ ॥

औहोऔहावः । ५

वा इत्यनुवर्तते । वा परे यथायथम् औहो उ हाउ एते स्तोभा भवन्ति । औहोउवा । रहस्ये तवेदिन्द्रायाम् । वरुणस्यार्कं आयुः स्वसुन्योंतिरित्यत्र । औउहोउउवा । प्रधन्वानास इति प्रथमे । औहोवा । रहस्ये कायमान इति द्वितीये । औहोउवा । रहस्ये प्रसोमदेव द्वितीये । शताउद्गावावाघद्भिजङ्घास्वरेषु । तवत्यन्वर्यमित्यत्र शतास्वरः । गावउपवदा इति द्वितीये उयिगावास्वरः । ऊर्द्धऊषुण इति वाघद्भिस्वरः । अग्निर्वृत्रा द्वितीये जङ्घास्वरः । उवाउउवा । यथागौर इति द्वितीये । या ए सा उउवा । अग्निस्तिग्मेनेति प्रथमे । हाउवा । गिर्वणःपाहिप्रभृतिषु ॥ ५ ॥

हायिनि । ६

औहो उ हाउ इत्यनुवर्तते । हायिपरे च तथा औहो उ हाउ एते स्तोभा भवन्ति । औहोहायि । अयापवस्व इति प्रथमे इष्टे स्वरे । इष्टाहोत्राः इति इष्टस्वरः । औहोउहाउ ।

इति प्रथमे। ३ २ १ ऽ५ २ ३ २ ३ २ ३

एतौ स्तोभौ भवतः । ४ ५ ४ ५ इयइयाहायि । लण्हिचैतवदितत्र । नत-
मण्होन इति प्रभृतिषु च । २र इयइयाऽहायि । तत्रमूषु द्वितीये ॥१०

॥ इति द्वितीयो दशकः ॥

इय । १.

हायिनीतत्रानुवर्तते । हायि परे पूर्वः इय स्तोभो भवति ।
४ ५ इयाहायि । अपघ्नन्पवत इतत्र । लण्हिचैतवदितत्र च ।
इन्द्रंविश्वा चतुर्थे च । १ २ इयाहाउ । रहस्ये बहुल मङ्गिरसां
व्रतेत्यादिषु ॥ १ ॥

होः । २

२ ३ ५
इय इतत्रानुवर्तते । होः परः इय स्तोभो भवति । होई२३४या ।
२र ३ र ३र २र ३ र
अपघ्नन्पवत इतत्र । होइया । अरिष्टे । ओहोइया । रहस्ये
२र र र र र
इन्द्रन्नर इति द्वितीये । होयियाहोयियाहोयिया३ । वैराजे ॥२॥

इह । ३

हो इतत्रानुवर्तते । होः परः इह स्तोभो भवति । होयिहा ।
र र २र
तिस्रोवाचईरयतीति चतुर्थे । होयिहा । भद्रे । होयिहा३ ।
१ ३ २
होयिहा । अश्विनोः व्रतयोः ॥ ३ ॥

य । ४

हो इतत्रानुवर्तते । होः परः य स्तोभो भवति । येत्यकार

उच्चारणार्थः । इयस्तोभस्यैव पुरस्ताद् यागमो भवतीति सम्पद्यते ।
१
होयिया अत्राहगौर इति द्वितीये । पिबासुत इति प्रथमे च ४॥

ङ । ५

२
हो इत्यनुवर्तते । होः परः ङ स्तोभो भवति यागमश्च ।
होयि । जगृह्मात इति तृतीये । इन्द्रसुतेष्विति प्रथमे च ॥ ५ ॥

दण्डावर्तियहेषु । ६

ङ इत्यनुवर्तते । दं ण्डा व र्ति य ह एतेषु परेषु पूर्वः
२ २ २ ५ २ १ २ ३ २
ङ स्तोभो भवति । इदामो२३५दाम् । इदामिदकम् । उपह्वरे
५ १७ —
इत्यत्र । इडा । त्वमग्ने यज्ञानामिति प्रभृतिषु । ऊर्मिरिवा२ ।
३ ५
परिस्वानास इति तृतीये । ई२३४तो । अग्निंवोवृधन्तमिति
द्वितीये । अरमखा इति प्रथमे । येतुपन्था इत्यत्र । यस्त्य-
१ — १
च्छम्बरमिति तृतीये । इतो३इति । अनड्वहते आदित्यव्रते च ।
१ २ २ २ ऽ २
आइतो३वा२ । सखायआसिषामह इति द्वितीये । ई३या
४
परिस्वानास इति तृतीये । इहा । परीतोषि सप्तमे अष्टमे च ।
इय इह एतेषु बहुलम् ॥ ६ ॥

यमि । ७

२ १ १ १ १
ङ इत्यनुवर्तते । यम् परे पूर्वः ङ स्तोभो भवति । ई३या२३४५म् ।
परिप्रिया इति द्वितीये ॥ ७ ॥

अ । ८

यम् इत्यनुवर्तते । यम् परे पूर्वः अ स्तोभो भवति ।
१ — १ २
आ२याम् । नाकेसुपर्णमित्यत्र । अयं या३ः । अत्तेदधामीति षष्ठे ।

३ २र १ २ ३ २ १ २
अयायायाम् । स्वाग्निरामर्के सम्मोल्वनिधने । अयंवायाउ । सप्तहे ।
१ २
आयाम् । रोहिणे ॥ ८ ॥

यौ । ९

अ इत्यनुवर्तते । याउ शब्दस्यैव सप्तम्येकवचने रूप मिदं यावितिं । याउ परे पूर्वः अ स्तोभो भवति । १ आयाउ । रहस्ये । अक्रान्त्समुद्रेऽत्र । कश्यपपुच्छे च । १र — २र १ आयार्उ । आयाउ । सहस्तत्र इतत्र ॥ ९ ॥

यायंयायोः । १०

अ इतत्रनुवर्तते । यायं याय् परयोः एतयोः पूर्वः अकारः स्तोभो भवति । ३ २र १ अयायं । नाकेसुपर्णमितत्र । ३ २ ३ ५ अयायो२३४ वा । सोमःपूषा इतत्र । अत्तेदधामौति ढतोये च ॥ १० ॥

॥ इति तृतीयो दशकः ॥

हावोसिथेषु । १

अ इतत्रनुवर्तते । हावो सि थ एतेषु परेषु पूर्वः अकारः स्तोभो भवति । ३ २ २ अहावो३हा । सनाद्ग्ने इत्यत्र । ३ २ ३ ५ १ र २र अहावोहा२३४वाः । अग्निष्ठ्होतारमित्यत्र । असिप्राणाए असि । १ १ — १ १ अभिपद्मा इत्यत्र । असी२असि । आदित्यात्मनि । अथा । बार्हद्गिरे । नित्यवत्सासु । मह्यानाग्निषु च ॥ १ ॥

भौ । २

अ इत्यनुवर्तते । भि-परे पूर्वः अकारः स्तोभो भवति ।

३ ५
आ२३४भौ । वयङ्ग्वा तृतीये ॥ २ ॥

वयोग्वेडाः । ३

भि इत्यनुवर्तते । भि-परे यथायथं वयो ग्वा इडा एते स्तोभा

२ ३ १ १ १ १
पर्यायेण भवन्ति । वयोभौ२३४५ः । आमन्द्रैरिति द्वितीये ।

३ ५ ४
ग्वा२३४भौः । उच्चातेजा षष्ठे । अरुचत द्वितीये च । इडा५भौः ।

अधाहीन्द्र प्रथमे ॥ ३ ॥

भायाम् । ४

इडा इत्यनुवर्तते । भा परे पूर्वः इडा स्तोभो भवति ।

१ २
इडा२३भा३४३ । अग्निन्दूतम्प्रभृतिषु ॥ ४ ॥

एहेः । ५

इडा इत्यनुवर्तते । एहिस्तोभात्परः इडा स्तोभो भवति ।

४ ५
एहीडा । तमिन्द्रंवाज इति चतुर्थे ॥ ५ ॥

या । ६

एहेरित्यनुवर्तते । एहिस्तोभात्परः या स्तोभो भवति ।

३८ २
एहिया । असाविदेव द्वितीये ॥ ६ ॥

द्वाभ्याम् । ७

येत्यनुवर्तते । द्वाभ्या मेहिभ्यामपि परः या स्तोभो भवति ।

३ ४ ५ ६ ६ २ ३ ५
प व स्व दे व ऐ । हीऐही२३४या । एवमादिषु ॥ ७ ॥

हेः । ८

येत्यनुवर्तते । हिस्तोभात्परः या स्तोभो भवति ।
२ ३ ३　　४　　५　　५
ग्न य ए३४ । हिया । यज्ञायज्ञा द्वितीये । हिहि हि या३ हाउ ।
चित्रइच्छिशोरिति द्वितीये । पदादौ हलुप्यते । * । तथाच आ
४ ५ ४ २ ५ ४　　५　　५
इत्येव श्रूयते । नरंनृषाह्मा५ ए३हि । आ३ हाउवा । प्रसंम्राजं
५　　५
तृतीये । हिया३ हाउवा । प्रतुद्रवेति द्वितीये तृतीये एषस्य
ते प्रभृतिषु च ॥ ८ ॥

होऔहवौहोवासु । ९

येत्यनुवर्तते । हो औहो औहोवा एतेषु परेषु पूर्वः
या स्तोभो भवति । उक्तं पुरस्तात् पदादौ हल् लुप्यत इति ।
१ २　　२　　१ ३ २
आहो आहो । कश्यपग्रीवायाम् । आ औहो । वत्सस्यत्वाद्ये
३ ५ २ ५
जङ्घास्वरे । अग्निर्हवा द्वितीये जङ्घास्वरः । आऔहो३ वा ।
सुरूपकृतु तृतीये । जग्मुह्मात चतुर्थे च ॥ ९ ॥

हार्दिश्च । १०

हो औहो औहोवा इत्यनुवर्तते । हो औहो औहोवा एतेषु
परेषु पूर्वः हार्दिश्चाकारः, तत्वतो हा स्तोभो भवति । उदाहर-
३ २ २
णानि । हाहो । आत्त्वासहस्रमिति द्वितीये शताक्षरे । तवन्नर्य-
२ १
मित्यत्र शताक्षरः । हाहो । इन्द्रापर्वतेत्यत्र नन्दाक्षरे । मूर्द्धान-
२ २　　१ २ २
मिति द्वितीये नन्दाक्षरः । इन्द्रायसो३ । हा औ३ हो । पवस्वमधु
२　　२ २
चतुर्थे । हाउ । औहो२३४वा । आग्निन्नस्येति प्रथमे ॥ १० ॥

॥ इति चतुर्थो दशकः ॥

औहोहादिषु । १

हा इत्यनुवर्तते । औ हो हा आदिषु परेषु पूर्वः हा स्तोभो भवति । हा । औहो२३४हा । याइन्द्रभुज द्वितीये । यदिन्द्र-प्रागिति द्वितीये च । हावौहोहाउ । रहस्ये अभित्वाषभा इत्यत्र । हावीन्द्रा इत्यत्र च । हाहो२३४हा । तङ्कूर्वया तृतीये । प्रसोमदेव पञ्चमे च । हाहा । परिस्रानो गिरिष्टा षष्ठे । आदि शब्देन ए ओ गृह्यते । हाउहा यत्सोममा । हाउ६हा । प्रतुद्रव चतुर्थे । हाउवा । रथन्तरे । उहुवा६हाउ । बृहत्साम्नि । हाउ-हाउहाउवा । पञ्चानुगाने ॥ १ ॥

वोहोवाहौवाहौहोवासु । २

हा इत्यनुवर्तते । वो होवा हौवा हौहोवा एतेषु परेषु पूर्वः हा स्तोभो भवति । हा । वो३हा । प्लवे । ऐहौहाउ होवा । शुष्टाग्ने इत्यत्र । पुनानःसोमधाहाउहोवा । हाउहोवा । द्वानु-गाने । हाउहोवाहायि । अचोदसो । प्रतेधारा । प्रहिन्वानासु । हाउहौहोवा६ । प्रवोमहे महेवृधे इत्यत्र द्वितीये । हाउ हौ । होवा इन्द्रोमदा षष्ठे ॥ २ ॥

ओवि । ३

हा इत्यनुवर्तते । उवा परे पूर्वः हा स्तोभो भवति । हाउवा । महित्रीणा द्वितीये । हाउ२३४वा । अयापवा तृतीये ।

सहोवावाराभरास्वरेषु । अग्निंवोवृधन्तमिति प्रथमे सहोवास्वरः । अश्वन्नत्वा तृतीये वारास्वरः । एन्द्रसानसिं प्रथमे भरास्वरः ॥३॥

ओम् । ४

ओवा इत्यनुवर्तते । ओवा परे पूर्वः ओम् स्तोभो भवति । ओमोवा । तमिन्द्रंवाज तृतीये । ओमो३ वा । समेतविश्वा तृतीये ॥ ४ ॥

उव । ५

इहापि ओवा इत्यनुवर्तते । ओवा परे पूर्वः उव स्तोभो भवति । उवा । उवा । इन्द्रत्वर इति इन्द्राष्टमे । उवा३ । उ३वा । तौरश्वसे ॥ ५ ॥

वा । ६

इह च ओवा इत्यनुवर्तते । ओवा परे पूर्वः वा स्तोभो भवति । वा३४३उ३४वा । कालेये । वासौवाउ२६४वा । मोषुत्वा द्वितीये । उवान्तेषु ॥ ६ ॥

ओः । ७

वा इत्यनुवर्तते । उकारात्परः वा स्तोभो भवति । उवा । उपप्रक्षेम इत्यत्र । उवा२ । सन्तेपया । सोमव्रते । मानागोभास्वरेषु । मानोहृणीथा इति प्रथमे मानास्वरः । उपोषुजा द्वितीये गोभास्वरः ॥ ७ ॥

हुवेपविषु । ८

पूर्वसूत्रस्थः पञ्चम्यन्त उरेवेह प्रथमान्तो भूत्वानुवर्त्तते । हुवे प वि एतेषु परेषु पूर्वः उ स्तोभो भवति । उहुवायि । उवा२३४दौ ।

अस्यप्रेषा इत्यत्र। उपा उप। उपा३१। परीतोषि त्रयोदशे।
उवी२उवि। आदित्यात्मनि उवी२। उवी। आनन्दे प्रतिनन्दे च॥ ८॥

दे:। ९

वि इत्यनुवर्तते। दिस्तोभात्परः वि स्तोभो भवति। दी२३४वी।
तमुअभि प्रथमे। दिवी२३४५। असाविसो द्वितीये तृतीये च।
हाउ दिवि। दिवी२दिवि॥ ९॥

वावंशंयाश:। १०

देरित्यनुवर्तते। सप्तमीबहुवचनस्य चेह लुग् द्रष्टव्यम्। वा वं शं या शः एतेषु पूर्वः दि स्तोभो भवति। उइ दी२३४वा। त्रैशोके। ए३। दिवं। प्रकेतुना प्रथमे। नाकेसुपर्णेति च। दिशन्दुहे। दिशांव्रते। दिवया। उदुब्रह्माणीत्यत्र। दी२३४शाः वयङ्त्वा चतुर्थे। क्षुल्लकवैष्टभे च। दिशःप्रदिशः। उदिशो विदिशः। दिशाएसएसर्पे। दिशः। प्रदिशः। उदिशः। महसि॥ १०॥

॥ इति पञ्चमो दशकः॥

वे:। १

पूर्वसूत्रेषु श्रुतो निमित्तपञ्चकान्तर्भूतः शः-शब्द एवेह विधेयतयानुवर्तते। विस्तोभात्परः शः स्तोभो भवति। वी२३४शाः। प्रसंम्राजमसुर इत्यत्र। इमानुकमित्यत्र च॥ १॥

यात् । २

यः इत्यनुवर्तते । यस्तोभात्परः यः स्तोभो भवति । यशोहाउ । तवेदिन्द्रा रहस्ये ॥

युः । ३

यादित्यनुवर्तते । यस्तोभात् परो युः स्तोभो भवति । एऽययू२३४५ः । मानइन्द्राभ्याऽदिश इति द्वितीये । उत्वामन्द इत्यत्र । ययुरे२३४५ । उच्चातेजा द्वादशे ॥ ३ ॥

ये । ४

इह च यादित्यनुवर्तते । यस्तोभात्परो ये स्तोभो भवति । हा । यथाइदिवोहायि । विश्वत् । ये इत्यस्यैव गानकृतं रूपं याइ इति, एव मन्यत्र च ॥ ४ ॥

हात् । ५

ये इत्यनुवर्तते । हकारात्परो ये स्तोभो भवति । हयायि । तरणिरित् द्वितीये । हयायि । वृत्रखला द्वितीये । हयायि । इन्द्रं विश्वा षष्ठे ॥ ५ ॥

वे । ६

हादित्यनुवर्तते । हकारात्परः वे स्तोभो भवति । हवेऽहोयि । इन्द्रसुतेषु द्वितीये । हवाऽजिणायि । महाँ इन्द्र इति द्वितीये ॥ ६

होः । ७

वे इत्यनुवर्तते । हस्तोभात्परः वे स्तोभो भवति । हुवाऽ ।

शन्नोदेवी द्वितीये । ह्वे२३ । पवित्रन्ते द्वितीये । ह्वा२ह्व । प्रधन्वासो चतुर्थे ॥ ७ ॥

उ । ८

होरित्यनुवर्तते । ह्स्तोभात्परः उ स्तोभो भवति । ह्उ२ । ह्लान्दाद्ये ॥ ८ ॥

ह्रात् । ९

उ इत्यनुवर्तते । ह्रास्तोभात्परः उ स्तोभो भवति । ह्राउ ह्राउ । परीतोषि चतुर्थे । प्राणाग्निश्च चतुर्थे । ह्रा२यि ऊ२ । ह्रषाह्विया द्वितीये । ह्राउ ह्राउ ह्राउ । कश्यपव्रतादये ॥ ९ ॥

ह्र । १०

ह्रादित्यनुवर्त्तते । ह्रा स्तोभात्परो ह्र स्तोभो भवति । ह्राह्र । अरिष्टे । अष्टेड़पदस्तोभे । सोमव्रते च ॥ १० ॥

॥ इति षष्ठो दशकः ॥

विपरीतः । १

ह्राह्र इति प्राक् सम्पन्नः स्तोभः, तयोर्विपरती इत्यर्थः । ह्स्तोभात्परः ह्रा स्तोभो भवति । ह्रह्राह्र । इदन्तएकमित्यत्र । ह्रह्राउ । ह्रह्रह्राउ । जमदग्नेर्व्रते ॥ १ ॥

ह्रवि । २

ह्र इत्यनुवर्तते । ह्रो परे पूर्वः ह्र स्तोभो भवति । पुरोह्रचोह्र ।

२ १ २ २ १ १ २ १ १ २ ३ २ १
प्रथीहहो । मानोहणीया द्वितीये । हहहोयि । हहहाहहोयि ।
२ २ १ २ ३ २ २
गावोयन्तायि इत्यत्र । हाहो । आत्मासहा द्वितीये । हहो३यि ।
प्राणाग्निश्च षष्ठे ॥ २ ॥

ए । ३

हवीत्यनुवर्तते । हो परे पूर्वः ए स्तोभो भवति । १ २ १ २ एहो एहो ।
कश्यपग्रीवायाम् ॥ ३ ॥

हि । ४

ए इत्यनुवर्तते । किञ्च पूर्वसूत्रे य एव प्रथमान्तः, स एवेह
पञ्चम्यन्तः । एकारात्परः हि स्तोभो भवति । २ २ २ ३ २ २
ऐहीयैहो१ । सुरूपकृत्नु द्वितीये ॥ ४ ॥

मात् । ५

हि इत्यनुवर्तते । मकारात्परः हि स्तोभो भवति । २ २
हाउ १ — १
महि । ३ । महो२महि । रहस्ये ॥ ५ ॥

हे । ६

मादित्यनुवर्तते । मकारात्परः हे स्तोभो भवति । २ २ १
दूत्यक्षरन्महे२३४५ । चित्रइच्छिशोरिति प्रथमे । २ महे१ । त्वमिन्द्र
बलादधि द्वितीये । समेतविश्वा द्वितीये च ॥ ६ ॥

हः । ७

मादित्यनुवर्तते । मकारात्परः हः स्तोभो भवति । १
आउ २ ५ २ १ ३ १ १ १ १
ऽ२इहि मा२३४हाः । अग्धूषु तृतीये । ए३महा२३४५ः ।
रहस्ये महःसान्नि ॥ ७ ॥

वात् । ८

ह्रः इत्यनुवर्तते। वात्परः ह्रः स्तोभो भवति। २ १११११ वा३ह्रा२३४५ः। ह्रह्रदयो द्वितीये अपामिवेतत्र च ॥ ८ ॥

यः । ९

वादित्यनुवर्तते। वात्परः यः स्तोभोऽपि भवति। ३ ५ वा२३४याः। आमन्द्रैरिति द्वितीये। २र १ १र२ ह्राउ३। वयः। वयोवयः। दिशांव्रते। २ र १ वयोह्रोयि। महावैश्वानरव्रते शुक्रियेषु च ॥ ९ ॥

वा । १०

ह्रह च वादित्यनुवर्तते। वात्परः वा स्तोभोऽपि भवति। १ ३ ५ १ १ ववा२ह्रा२३४साः। दैवातिथे। ववा२३५ह्रोयि। वयङ्गा इत्यत्र गोभास्वरे। उपोषुजा द्वितीये गोभास्वरः ॥ १० ॥

॥ इति सप्तमो दशकः ॥

स्तुषे ॥ १

ह्रहापि वादित्यनुवर्त्तते। वात् परः स्तुषे स्तोभश्च भवति। १ ३ ५र र १ १ ३ वा२ह्रा२३४ औह्रोवा। स्तुषे१। इतऊती प्रथमे। वा२ह्रा२३४ ५र र २ ११११ औह्रोवा। स्तौ३षा२३४५यि। इतऊती द्वितीये। १ २र वाइ। स्तौषे १ १ १ १ २३४५। उक्थामह्रोयवे आमह्रोयवे च ॥ १ ॥

हुम्मान्तश्च । २

हुम् स्तोभः केवलो भवति; चकारात् मास्तोभान्तोऽपि भवति। हुम्। स्वारसौपर्णे। मान्तो यथा। हुम्मायेइ। श्वेत-भ्रुतिषु ॥ २ ॥

आवो हौहोहौहोवा । ३

आवः इति पञ्चमी । औकारात्परः हौहो हौहोवा स्तोभौ भवतः । २र १र औहौहोयि । इन्द्रायसामगायत इति तृतीये । प्रधन्वासो तृतीये । १—१६ २ २ औ२ । हौ३हो३वा । समेतविश्वा तृतीये । २र १र १र — औहौहोवा२ । अन्तरिक्षे । हाउमहीत्यत्र च ॥ ३ ॥

स्वरतज्योतिषी । ४

द्विवचनम् । स्वरत-ज्योतिषी स्तोभौ भवतः । ५ र हाउस्वरता । ५ र २ १ २ २ १ १ १ १ १ हाउ । अभि । स्वरता । स्वरतस्वरा२३ता । स्वरा३ता२३४५ । १ २ ३ १ १ १ १ सुवर्ज्योती२३४५: । रहस्ये सत्रस्यर्द्धौ । पुरुषव्रते । दिशांव्रते च ॥४

एतदुत्तरस्थानानि पञ्चसूत्राणि विलुप्तानि ॥ ५—९ ॥

ओको गीतभूतः । १०

३ ४ ओकस्तोभः गीतभूतो भवति । ओ२३४का: । तमुअभि तृतीये ॥१०॥

॥ इति अष्टमो दशकः ॥

पाता । १

३ ओक इत्यनुवर्तते । ओकस्तोभः पाताक्षरो भवति । ओ२का १ १ १ १ २३४५: । वैतहव्ये । आयाह्ययमिति द्वितीये पाताक्षरः ॥ १ ॥

हाउहोवाहा । २

पातेत्यनुवर्तते । हाउहोवाहा स्तोभसमूहः पाताक्षरो भवति । २ र २ २ हाउहोवा२हायि । अचोदस इति तृतीये । प्रतेधारा इत्यत्र प्रहिन्वान इत्यत्र च ॥ २ ॥

वाहा । ३

पातेत्यनुवर्तते । वाहा स्तोभः पाताक्षरो भवति । २ २ वा३हा३यि । सखायस्त्वेत्यत्र । अयारुचा इति तृतीये च ॥ ३ ॥

ईयइयाहा । ४

पातेत्यनुवर्तते । ईयइयाहा स्तोभसमूहः पाताक्षरो भवति । २र २ ईयइया३हायि । त्यमूषु द्वितीये ॥ ४ ॥

सूष्वा । ५

ईयइयाहा इत्यनुवर्तते । ईयइयाहा स्तोभसमूहः सूष्वाक्षरश्च भवति । ४ ५ ४ ५ ईयइयाहायि । त्वण्हिचैतवदिति प्रभृतिषु । सूष्वाणासा इति प्रथमे सूष्वाक्षरः ॥ ५ ॥

एनेयाहा । ६

इयाहा स्तोभसमूहः एनाक्षरो भवति । इकारस्य ऐभावस्तु सामतन्त्रे उक्त एव । ४ ५ ऐयाहायि । आतेवल्गोमनो इति द्वितीये । एनावोअग्निमिति प्रथमे एनाक्षरः ॥ ६ ॥

उहुवाहा । ७

एना इत्यनुवर्तते । उहुवाहा स्तोभसमूहश्च एनाक्षरो भवति । ४ ५ उहुवाहायि । कायमान इति द्वितीये ॥ ७ ॥

औहोवाहा । ८

एना इत्यनुवर्तते । औहोवाहा स्तोभसमूहश्च एनाक्षरो भवति । ५र ४ ५ औहोवाहायि । असाव्यंशुरिति पञ्चमे । अभिनवन्त इति तृतीये । अपामिवेत्यत्र च ॥ ८ ॥

जारा हौहोवाहा । ९

हौहोवाहा स्तोभसमूहः जारास्वरो भवति । ४र ५ हौहोवाहायि । अग्निमिन्धान इत्यत्र । यदिन्द्राहमिति प्रथमे । पवस्वदद्य इति प्रथमे च । जराबोध इति प्रथमे जारास्वरः ॥ ९ ॥

होवाहा । १०

जारा इत्यनुवर्तते । होवाहा स्तोभसमूहश्च जारास्वरो भवति । ४ ५ होवाहायि । अपामिवेत्यत्र । १ २ रहस्ये होवाहायि । योन इद्दमित्यत्र च । जारास्वरस्य उद्गूहः ॥ १० ॥

॥ इति नवमो दशकः ॥

वाहा । १

जारा इत्यनुवर्तते । वाहा स्तोभसमूहश्च जारास्वरो भवति । ४ ५ वाहाइ । अग्नेविवस्वदाभर इत्यत्र । तिस्रोवाच इति चतुर्थे । मृज्यमान इति चतुर्थे च ॥ १ ॥

होवा । २

जारा इत्यनुवर्तते । होवा स्तोभसङ्घश्च जारास्वरो भवति । ४र ५र होवाइ । मूर्द्धानमिति द्वितीये । होवा । योनिष्टइन्द्र इति द्वितीये । प्रसेनानोरिति प्रथमे च ॥ २ ॥

ओवा । ३

जारा इत्यनुवर्तते । ओवास्तोभश्च जारास्वरो भवति । ४ ५ ओवा । अवद्रप्स इति चतुर्थे ॥ ३ ॥

एहिया। ४

जारा इत्यनुवर्तते। एहियास्तोभसमूहश्च जारास्वरो भवति।
५ २ २ २ ४ ५ ४ ५
औहोहुम्। हा। एहिया। खादिष्ठया इति अष्टमे। एहिया।
१ २
हषापवस्व इति पञ्चमे। आइहिया। रौहिणे। एकारस्य आइ
भावः, उदूहश्च॥ ४॥

ऐही। ५

४ ५
जारा इत्यनुवर्तते। ऐही स्तोभः जारास्वरो भवति। ऐही।
१ २
सुरूपकृतुमिति तृतीये। वैराजऋषभे। रौहिणे च। आइही।
ऐकारस्य आइभावः, उदूहश्च॥ ५॥

हाहा। ६

जारा इत्यनुवर्तते। हाहा स्तोभः जारास्वरो भवति।
१ २ १ २
हाहाउ। अङ्गिरसांव्रते। जमदग्नेर्व्रते। हहाउ। आकारस्य
अत्वम्। विकर्णे च॥ ६॥

पता। ७

हाहा इत्यनुवर्तते। हाहा स्तोभः पतास्वरोऽपि भवति।
२ २
हा२हायि। अदर्शिगातुवित्तम इतेऽतत्यभृतिषु। आयाह्ययमिति
तृतीये पतास्वरः॥ ७॥

शता। ८

हाहा इत्यनुवर्तते। हाहा स्तोभः शतास्वरोऽपि भवति।
३र २र
हाहा। परिस्वानोगिरिष्ठा इति पञ्चमे षष्ठे च। तवत्यन्वर्य-
मित्यत्र शतास्वरः॥ ८॥

औहो । ९

जारा पता श्रता चानुवर्तन्ते । औहो-स्तोभस्य यथायथं पर्य्यायेण जारा पता श्रता च स्वरो भवति । ५ र ४ र वयामौहो । ५ ५ २ २ इदꣳहि४औहो । मृणा३४ औहो । बोधन्मना इत्यत्र । जराबोध इति प्रथमे जारास्वर इत्युक्तमेव । २ २ औ३हो । सखाय आशिषा-महइति तृतीये । आयाह्यमिति तृतीये पतास्वर इत्यप्युक्तम् । ३र २ ३ ४ ५ ३र र ४ ५ औहोयि । शग्मदाम् । औहो३यि । आयाहौ । आत्वारथमिति द्वितीये । परीतोषि तृतीये । राजने च । तवत्यन्नर्यमित्यत्र श्रतास्वर इति चोक्तमेव पुरस्तात् ॥ ९ ॥

नन्दाइन्द्रातद्विविढ्ढाः । १०

औहो इत्यनुवर्तते । औहो-स्तोभस्य यथायथं पर्यायेण नन्दा आइन्द्रा तद्विविढ्ढा च स्वरो भवति । २र १ औहो । आतून इति तृतीये । पवतेहर्यत इति प्रथमे च । मूर्द्धानमिति प्रथमे नन्दास्वरः । १ ऽ २ औ३होयि । परीतोषि तृतीये । पवतेहर्यत इति प्रथमे च । संहिते आइन्द्रास्वरः । १र औहोयि । ज्ञेयथेति प्रथमे । जराबोध इति प्रथमे तद्विविढ्ढास्वरः ॥ १० ॥

॥ इति दशमो दशकः ॥

द्वितीयः । १

औहो इत्यनुवर्तते । औहो-स्तोभस्य बहुत्र द्वितीयस्वरोऽपि भवति । २र र औहोइ । तमिन्द्रंवाजइति चतुर्थे । २ र र तौहो । अयारुचा द्वितीये च ॥ १

सार्वा। २

औहो इत्यनुवर्तते। औहो-स्तोभस्य सार्वास्वरोऽपि भवति।
१ —
औहो२। क्रीयथेति प्रथमे। रहस्ये इन्द्रज्येष्ठमितात्र च। यद्य-
कच्च इत्यत्र सार्वास्वरः॥ २॥

एहिहौहोहोइ। ३

सार्वा इत्यनुवर्तते। एहि हौहो होइ एते स्तोभाश्च
१ —
सार्वास्वरका भवन्ति। आइहो२। युंक्ष्वाहिह्नचहन्नित्यत्र। एका-
१२ —
रस्य आइभावः। ऐहो२। परीतोषो हादशे। एकारस्य ऐभावः।
१ —
आइहो२। रहस्ये प्रसोमदेववीतय इति द्वितीये, विश्वेदेवा
१ —
इत्यत्र च। एतयोश्चाइभावः। हौहो२। इन्मेराजा इति द्वितीये।
१ —
होई२। जगृह्मात इति तृतीये॥ ३॥

उहाहोहुवे। ४

सार्वा इत्यनुवर्तते। उ हा हो हुवे एते स्तोभाश्च सार्वास्वरका
१— १—
भवन्ति। ऊ२। इन्द्रंविश्वा तृतीये। हा२यि। हुषाहिया द्वितीये।
१ —
हो२यि। रहस्ये आप्रागादित्यत्र। इन्द्रसुतेष्विति प्रथमे च।
१ — १ २
हुवा२यि। परिप्रिया द्वितीये। प्रधन्वास इति चतुर्थे च। हुवाये।
यदिन्द्राहमितेत्यभृतिषु। इकारस्य आयेभावश्च॥ ४॥

ह्रयौहावैहिया। ५

सार्वा इत्यनुवर्तते। ह्रया औ हौ एहिया एते स्तोभाश्च
१— १—
सार्वास्वरका भवन्ति। ह्रया२। पुनानःसो द्वितीये। औ२।

१—
हौ२ । इममिन्द्र इति द्वितीये । समेतविश्वा इति द्वितीये तृतीये
१२ —
च । एहिया२ । पुरोजितीति श्यावाश्वे ॥ ५ ॥

ओवा । ६

सार्वा इत्यनुवर्तते । ओवा स्तोभश्च सार्वास्वरो भवति । १२—
ओवा२ । रहस्ये पञ्चनिधनवैरूपे । सोमव्रते च ॥ ६ ॥

हौष्याइन्द्रान्धामानीषु । ७

ओवा इत्यनुवर्तते । हौषी आइन्द्रा आन्धा मानी, एतेषु
३ ५
स्वरेषु ओवा स्तोभो भवति । ओ३३४वा । त्वꣳहेहौति द्वितीये
१२ २
हौषीस्वरे । ओ३वा । अयꣳसहस्रमिति द्वितीये आइन्द्रास्वरे ।
१ २
उच्चाद्वादशे, रहस्ये तौरश्ववसोत्तरे च । ओवा । योविश्वा इति
२ ५
द्वितीये आन्धास्वरे । दिवया, उदुब्रह्माणीत्यत्र च । ओ३४वा ।
वृषापवस्वेति चतुर्थे मानीस्वरे । इन्द्रंवयमिति द्वितीये । असा-
व्यꣳशुरिति तृतीये च । असर्जिवक्वेत्यत्र मानीस्वरः ॥ ७ ॥

ओहा । ८

हौष्याइन्द्रान्धामानीष्वित्यनुवर्तते । हौषी आइन्द्रा आन्धा
३ ५
मानी, एतेषु स्वरेषु च ओहा स्तोभश्च भवति । ओ२३४हायि ।
१२ २
विश्वतोदावन्निति प्रथमे हौषीस्वरे । ओ३हा । योविश्वाइति तृतीये
१ २ २ ५
आइन्द्रास्वरे । ओहा । रहस्ये सहस्तन्न इतत्रान्धास्वरे । ओ३४हा ।
एषब्रह्मेति तृतीये मानीस्वरे, इन्द्रायेन्दो समिमे च ॥ ८ ॥

शता । ९

उहा इत्यनुवर्तते । उहा स्तोभः शताक्षरोऽपि भवति । उहा । ३ २ २
अभिक्षिप्तमिति सम्मायाम् । रहस्ये राजने च ॥ ९ ॥

एहिहाहोहुवे । १०

एहि हाहो हुवे एते स्तोभा अपि शताक्षरका भवन्ति ।
ऐहो । ३ २ २ रहस्ये असाविदेव इति द्वितीये । एकारस्य ऐ-भावः ।
हाहो३इ । ३ २ यज्ञायज्ञा प्रथमे । हाहोयि । परिस्वान इति षष्ठे च ।
हुवा३ । ३ २ अग्नेयजिष्ठ इति द्वितीये ॥

एते स्तोभा नन्दाक्षरका अपि श्रूयन्ते । मूर्धानमिति प्रथमे
नन्दाक्षर इत्युक्तं पुरस्तादेव । ऐहोयि । ३ २ १ आतून इति तृतीये ।
त्वञ्चेहीति प्रथमे च । एकारस्य ऐ भावः, उकारस्य उयि
भावश्च । हाहोयि । ३ २ १ इन्द्रापर्वतेतत्र । हुवायि । ३ २ १ इन्द्रायेन्दो इति
चतुर्थे । परिप्रिया इति द्वितीये च ॥ १० ॥

॥ इति एकादशो दशकः ॥

एहियोहुवेवाहा । १

शता इत्यनुवर्तते । एहिया उहुवे वाहा एते स्तोभाश्च शता-
क्षरका भवन्ति । ३ २ २ एहिया । यज्ञायज्ञा प्रथमे । ३ २ २ उहुवायि । स्वादि-
ष्टयेति चतुर्थे । प्रतुद्रवेति चतुर्थे । अस्यप्रेषेति द्वितीये तृतीये च ।
३ २ २ प्रसेनानीः प्रथमे । वाहा३४३इ । त्यमुवः-सत्रासाहमिति
द्वितीये ॥ १ ॥

औहोवा । २

शता इत्यनुवर्तते । औहोवा स्तोभश्च शतास्वरो भवति ।
३ २ २
औ३होवा । इन्द्रायेन्दो इति तृतीये । सखायस्त्वा तृतीये च ॥२॥

सप्तानाब्रुवाणाप्रेष्ठंवा । ३

औहोवा इत्यनुवर्तते । औहोवा-स्तोभश्च सप्ताना ब्रुवाणा
२२ १ ३ २
प्रेष्ठंवा च स्वरो भवति । औहो३वा । प्रमित्रायेति द्वितीये ।
२२ १ २
परिकोशमिति सप्तानास्वरः । औहोवा । अयावीति द्वितीये ।
२२ १ २
धर्तादिव इति द्वितीये । औहोवा । आयुश्चक्षुर्ज्योतिरिति वरुण-
४२ ५२ ४
स्यार्कै । प्रकाव्यमिति द्वितीये ब्रुवाणास्वरः । औहोवा । अद्यनो-
देवेति प्रथमे । प्रेष्ठंवा इति प्रथमे प्रेष्ठंवास्वरः ॥ ३ ॥

त्यमूषुवाघद्गोवप्रिया । । ४

औहोवा इत्यनुवर्तते । औहोवा-स्तोभः त्यमूषु वाघद्भि इव-
५२ २
प्रिया च स्वरो भवति । औहोवा सखायआसिषामेति तृतीये ।
प्रदेवमच्छेत्यत्र गणेतदिन्द्रेति प्रथमे च । त्यमूषु आद्ये त्यमूषुस्वरः ।
२२ १ —
औहोवा२ । आनोमित्रा इत्यत्र । पवित्रन्त इति द्वितीये ।
रहस्ये कायमान इति द्वितीये च । ऊर्ङ्ऊषुण इत्यत्र वाघद्भि-
१ ३ ४
स्वरः । औ२हो२३४वा । आत्वारथमिति द्वितीये । प्रेष्ठंव इति
द्वितीये इवप्रियास्वरः ॥ ४ ॥

हाहाकयामाहंहि । ५

औहोवा इत्यनुवर्तते । औहोवा स्तोभस्य हाहा कया माहंहि
२२ २
च स्वरो भवति । औहो३वा । इन्द्रोमदायेति पञ्चमे । परीतोषि

१ २ २
तृतीये । अजोवैरूपे हाहास्वरः । औ२३होवा । जगद्भात इति चतुर्थे । गणेतदिन्द्रेति प्रथमे । प्रसोमासोमदच्युत इत्यत्र ।
२ ४ ५
वामदेव्ये कयास्वरः । औ३होवा । त्वमग्नेयज्ञाना मित्यत्र । सुतेष्विति द्वितीये माहंहिस्वरः ॥ ५ ॥

जङ्घा । ६

औहोवा इत्यनुवर्तते । औहोवा स्तोभस्य जङ्घास्वरोऽपि भवति ।
१ २ २
औहो३वा३ । अग्निर्हवाणीति द्वितीये । तत्रैव जङ्घास्वरः ॥ ६ ॥

होवाहा पाता च । ७

चकारात् जङ्घा पौहं समूचीयते । होवाहा स्तोभसमूहः
२२ २
पातास्वरो जङ्घास्वरश्च भवति । होवा३हायि । अग्निंवो वृधन्त-मिति प्रथमे । आयाह्यग्नयमिति द्वितीये पातास्वर इत्युक्तम् ।
१ २ २
होवा३हायि । वृहद्विरग्न इति प्रथमे । अग्निर्हवाणीति द्वितीये जङ्घास्वर इति चोक्तम् ॥ ७ ॥

हौहोवा । ८

पाता जङ्घा इत्युभावेवानुवर्त्तेते । हौहोवा-स्तोभसमूहस्य च
२२ २
पाता जङ्घा स्वर उभावेव श्रूयेते । हौहो३वा । आत्वासखाय
१८ २ ५
इत्यत्र पाता स्वरः । हौ३हो ३वा । यच्छक्रासीति प्रथमे जङ्घा स्वरः । समेतविश्वा इति द्वितीये तृतीये च ॥ ८ ॥

होवा । ९

पाता इत्येवेहानुवर्तते । होवा स्तोभः पातास्वरो भवति ।
२ २
हो३वा । इदंवसो इति तृतीये । एन्द्रनो इति द्वितीये च ॥ ९ ॥

आम्राहिता । १०

होवा इत्यनुवर्तते । होवा स्तोभस्य आम्राक्षरौ हिताक्षरश्च भवति । होवा । परिप्रिया द्वितीये । परिस्रानोगिरिष्ठा षष्ठे आम्राक्षरः । होवाइ । नित्वामग्न इति द्वितीये । उवा । उपप्रक्षेम इत्यत्र ; इकारलोपः । अग्निरुक्था द्वितीये हिताक्षरः ॥ १० ॥

॥ इति द्वादशो दशकः ॥

इह । १

आम्रा हिता चानुवर्त्तते । इह स्तोभस्य च आम्राहिताक्षरौ भवतः । इहा इहा । अग्निस्तिग्मेन इति तृतीये ॥ १ ॥

शतातयायाज्ञाः । २

इहा इत्यनुवर्तते । इहा स्तोभस्य यथायथं पर्यायेण शतातया-याज्ञाश्च स्वरा भवन्ति । इहा । जातःपरेण इत्यत्र । प्रत्युअदर्शि इत्यादिषु च । तवत्यमिति शताक्षरः । इहा । उपोषुजा प्रथमे । रहस्ये अयम्भूषा तृतीये । अग्नआयाहीति द्वितीये तयाक्षरः । ईइहा । आतून इति चतुर्थे । इन्द्रायगिर इत्यत्र च । यज्ञायज्ञा द्वितीये याज्ञः स्वरः ॥ २ ॥

वाओवा । ३

याज्ञ इत्येवानुवर्तते । वाओवा स्तोभः याज्ञस्वरो भवति । वाइ४इ ओइ४वा । तरोभिः सप्तमे । परिस्रानोगिरिष्ठा इति तृतीये च ॥ ३ ॥

आराता । ४

वाउवा इत्यनुवर्तते । वाउवा स्तोभः आरातास्वरोऽपि भवति ।
१ २
वाउवा । उपप्रचेम इत्यत्र । पुनानःसो दादशे । त्वन्नोअग्नइति
द्वितीये आरातास्वरः ॥ ४ ॥

होइहोवा । ५

आराता इत्यनुवर्तते । होइहोवा-स्तोभसमूहश्च आरातास्वरो
१ २
भवति । होइहोवा । इमाउत्वाविचक्षत इत्यत्र ॥ ५ ॥

ओमोवा । ६

आराता इत्यनुवर्तते । ओमोवा स्तोभश्च आरातास्वरो भवति ।
१ २
ओमोवा । तमिन्द्रंवाज इति द्वतीये । समेतविश्वा द्वतीये च ॥६॥

आभी । ७

ओमोवा इत्यनुवर्तते । ओमोवा स्तोभस्य आभीस्वरश्च भवति ।
१ऽ २
ओमो३वा । अभित्वापूर्व इत्यत्र । तंवोदस्म इति नौधसे
आभीस्वरः ॥ ७ ॥

होहेयाहुम्हुम् । ८

आभी इत्यनुवर्तते । होहा इया हुम्हुम् एते स्तोभाश्च आभी-
१ऽ २
स्वरका भवन्ति । होऽहा३ । अग्निमिन्धान इत्यत्र । ई३या । परि-
१ऽ २
प्रिया द्वितीये । इ३म्हुम् । तंवोदस्ममिति चतुर्थे ॥ ८ ॥

जान्तश्च । ९

हुम् इत्यनुवर्तते ; जा, आन्तः, च, इति पदच्छेदः । हुम् स्तोभः,
'च' अपि 'आन्तः' आकारान्तः हुम्स्तोभः 'जा'-स्वरो भवति ।

१ १
हुम् । उह्वेदभीति स्वारसौपर्णे । हुम्मायि । यज्ञायज्ञीये ।
१
हुम्माये३ । श्वेतप्रभृतिषु । उदुत्यञ्जात इत्यत्र जास्वरः ॥ ९ ॥

ओहोओहाइ । १०

जा इतग्रनुवर्तते । ७ हो ७हायि एते स्तोभाश्च जास्वरका भवन्ति । १ ७इ । चित्रइच्छिशोरिति प्रथमे । उपप्रक्षेमेतग्रच । सङ्घातश्च । होयि । होयि । नहिवश्वरममिति द्वितीये । १ ७हायि । दधिक्राण्ण इतग्रच ॥ १० ॥

॥ इति त्रयोदशो दशकः ॥

॥ प्रथमः प्रपाठकश्च समाप्तः ॥

हितामन्द्रौ । १

७हायि इतग्रनुवर्तते । ७हायि स्तोभः हितास्वरो मन्द्रस्वरश्च
४ ५ २ २
भवति । ७हायि दधिक्राण्ण इतग्रच । ७हायि । यद्दिन्द्रना प्रभृतिषु च । अग्निरुक्था द्वितीये हितास्वरः । मन्द्रयासो इति मन्द्रस्वरः ॥ १ ॥

हाओहा । २

इह मन्द्र इतेग्रवानुवर्तते । हाउहा स्तोभः मन्द्रस्वरो भवति ।
५ २ २ २ ५ २ ५
हाउहायस्तोममा । हाउ६हा । कर्षणम् । प्रतुद्रव इति चतुर्थे ॥ २

वारा । ३

हाउहा इतग्रनुवर्तते । हाउहा स्तोभः वारास्वरो भवति ।
२ २ ५
हाउ२३४हायि । पवस्वसोममधुमानित्यत्र । अश्वन्नत्वा द्वतीये वारास्वरः ॥ ३ ॥

वाओवौहोवाहाहोहा । ४

वारा इतग्रनुवर्तते। वाउवा औहोवा हाहोहा एते स्तोभाश्च
वाराक्षरका भवन्ति। वाउ२३४वा। वस्याए इन्द्रासोतग्रत्र।
सोमउष्वा इति षष्ठे। इन्दुर्वाजीति द्वितीये च। औ३हो२३४वा।
इमामिन्द्र द्वितीये। हाउ२३४हा। प्रसोमदेव इति पञ्चमे ॥ ४ ॥

हाओवाहाओवा । ५

वारा इतग्रनुवर्तते। हाउवाहाउवा इति द्विरुक्तः स्तोभ-
सङ्घश्च वाराक्षरो भवति। हाउ२३४वा। हाउ२३४वा। परीतो-
षीति अन्ते। अयापवा इति तृतीये। सहोयस्तेमद इति
तृतीये च ॥ ५ ॥

सप्राना सस्वरि खि । ६

हाउवा इतग्रनुवर्तते; 'खि' अभ्यस्तः; सप्राना इति तस्यैव
विशेषणम्। अभ्यस्तः, सप्रानाक्षरको हाउवा स्तोभः 'सस्वरि'
स्वरान्तो भवति। हाउवा। उवा३४५। महित्वीणामिति द्वितीये
तिस्रोवाच इति षष्ठे च। परिकोशमितग्रत्र सप्रानाक्षरः ॥ ६ ॥

णङ्कृणु । ७

हाउवा इतग्रनुवर्तते। हाउवा स्तोभः णङ्कृणुस्वरो भवति।
हाउवा। अष्टमे वैरूपे। इवेविराजं मभ्रात्व्यो इति रहस्ये।
विश्वतोदावन्निति रहस्ये नवस्तोभे च। वृषासान्नि इमाउवा
इतग्रत्र। णङ्कृणुस्वरः ॥ ७ ॥

वृत्राणि । ८

हउवा इतग्रनुवर्तते। हाउवास्तोभः वृत्राणिस्वरश्च भवति।

५ ४ ५
हाउवा । पाहिनोअग्न इति तृतीये । सोमउष्वा प्रथमे च ।
अग्निर्वृत्राणीति द्वितीये वृत्राणिस्वरः ॥ ८ ॥

औहोहा । ९

वृत्राणीत्यनुवर्तते । औहोहा स्तोभश्च वृत्राणिस्वरो भवति ।
५ ४ ५
औहोहायि । अयापवा इति प्रथमे यज्ञे ॥ ९ ॥

॥ इति प्रथमो दशकः ॥

स्वरः । १

औहोहा इत्यनुवर्तते । औहोहा स्तोभसङ्घः स्वरःस्वरोऽपि
३ ५ २
भवति । औहोइहा३ । यदाकदा इति द्वितीये । इमास्त इन्द्र
इत्यत्र च । हाउ३वाजा२म् साम्नि स्वरःस्वरः ॥ १ ॥

तिरौं । २

औहोहा इत्यनुवर्तते । औहोहा स्तोभसङ्घः तिरौंस्वरश्च
२ ३ २
भवति । औ३होहायि । कयान इति वामदेव्ये । आहर्यता इति
चतुर्थे तिरौंस्वरः ॥ २ ॥

औहो न्वन् । ३

नुशब्देन प्रत्यक्क्रमः ; अन्शब्देन अन्तः ; तिरौं इति चानु-
वर्तते । औहोस्तोभः तिरौं स्वरो नु-अन्तश्च भवति ; प्रत्यक्-
३ २
मान्तो भवतीत्यर्थः । औहो१यि । इमाउत्वापुरूवसोअभि-
प्रनोनवुरित्यत्र । प्रेष्ठंव इति द्वितीये । वैराजे च ॥ ३ ॥

एह्यौ । ४

द्विवचनम् । तिपौ इत्यनुवर्तते । एहि स्तोभो द्विरुक्तश्च तिपौस्वरो नु-अन्तो भवति । ऐहीयैह्यौ१ । सुरूपकल्प मिति द्वितीये । एकारस्य ऐभावोऽन्त्यदीर्घश्च ॥ ४ ॥

वेदसङ्गृ । ५

एह्यौ इत्यनुवर्तते । वेद-सङ्गृ-स्वरयोश्च एहि द्विरुक्तः स्तोभो भवति । एकारस्यैभावोऽन्त्यदीर्घश्च सिद्ध एव । ऐह्यैयैह्यौ । क्षत्र-वृषभ इति तृतीये । कईं वेदा इति वेदस्वरः । ऐह्यौ२ । ऐह्यौ२ । परीतोषीति एकादशे । आतून इति प्रथमे सङ्गृस्वरः ॥ ५ ॥

ओन्दधा । ६

ओम् स्तोभः दधास्वरो भवति । ओ३१म् । ग्राकरक्षभे । महावैश्वानरव्रते च । अग्नेदधामीति षष्ठे दधास्वरः ॥ ६ ॥

उप । ७

दधा इत्यनुवर्तते । उप स्तोभश्च दधास्वरो भवति । ए३ । उपा२३४५ । अपादुशो प्रथमे द्वितीये च ॥ ७ ॥

गाया । ८

उप इत्यनुवर्तते । उप स्तोभः गायास्वरोऽपि भवति । उपा३१ । परीतोषि त्रयोदशे । गायन्तिला प्रथमे गायास्वरः ॥ ८ ॥

औहो । ९

गाया इत्यनुवर्तते । औहो स्तोभः गायास्वरोऽपि भवति ।

२ २
औहो३१यि । आत्वारथमिति द्वितीये । यत्सोममिति चतुर्थे पिबा वैराजे । पवतेहा द्वितीये च ॥ ८ ॥

नन्दौहौहा । १०

२ २ १ २
औहौहो स्तोभः नन्दाक्षरो भवति । औहौहोयि । प्रधन्वास इति तृतीये । मूर्धानन्दिव इति प्रथमे नन्दाक्षर इत्युक्तम् ॥१०॥

॥ इति द्वितीयो दशकः ॥

हये । १

१ २ २
हये स्तोभो नन्दाक्षरो भवति । हयाये३ । वत्रस्त्वा द्वितीये । इन्द्रंविश्वा सप्तमे च ॥ १ ॥

द्वौ नृम्णे । २

२ २
द्वौ हये-स्तोभौ नृम्णाक्षरौ भवतः । हयायि । हयायि । तरणिरिति द्वितीये । इन्द्रंविश्वा इति षष्ठे च । एन्द्रपृक्षु इति नृम्णाक्षरः ॥ २ ॥

हाउवा । ३

नृम्णा इत्यनुवर्तते । हाउवा स्तोभश्च नृम्णाक्षरो भवति ।
२
हाउवा । गिर्वण इत्यत्र ॥ ३ ॥

उवापूर्वः । ४

नृम्णा इत्यनुवर्तते । उवापूर्वो हाउवा स्तोभश्च नृम्णाक्षरो
२ २ २
भवति । क्राउ । वा३ । हाउवा । इन्दुर्वाजी तृतीये । सोमाः पवन्त इति प्रथमे च ॥ ४ ॥

हा बि। ५

नृम्णा इत्यनुवर्तते। 'बि' मन्द्रस्वरे वर्त्तमानो हाशब्दपूर्वश्च हाउवा स्तोभः नृम्णास्वरो भवति। ५ हा। २ हाउवा। परीतोषि द्वितीये। अधज्मा इत्यत्र च ॥ ५ ॥

औहो। ६

हा, बि, नृम्णाचानुवर्तते। मन्द्रस्वरे वर्तमानो हाशब्द-पूर्वो औहो स्तोभश्च नृम्णास्वरो भवति। ५ हा। २ र हाऔहोयि। प्रकेतुना द्वितीये। अस्यप्रेषा पञ्चमे च ॥ ६ ॥

पाह्योहाए। ७

उहाए स्तोभः पाहिस्वरो भवति। ५र उहा ५ ए। योविश्वा इति तृतीये। प्रप्रवस्त्रिष्टुभमित्यत्र। पुनान इति सदोविंशीये च। पाहिनोअग्न इति द्वितीये पाहिस्वरः ॥ ७ ॥

आऔहो स्तोत्रानुबन्धः। ८

आपूर्वः औहो स्तोभः स्तोत्रानुबन्धः स्वरो भवति। १ २ २ आऔ३हो। वृत्रस्यत्वा द्वितीये। प्रमित्राय तृतीये स्तोत्रानुबन्धस्वरः ॥ ८ ॥

एहियौहोवा च। ९

चकारात् आ इत्यनुवर्तते। आपूर्वः औहोवा स्तोभस्तु एहिया स्वरो भवति। ४ ५र आऔहो ५ ए वा। सुरूपकृत्नुमिति तृतीये। जगृभ्मात इति चतुर्थे च। विशोविश्वा इत्यत्र एहियास्वरः ॥ ९ ॥

औहोहोवा पिबा द्विता मही यसा। १०

औहोहोवा स्तोभसमूहस्य पिबा, द्विता, मही, यसा च स्वरो भवति। २र र १र — औहोहोवा२। महित्वीणामिति हाउमहीत्यत्र। ब्राह्म-

णादौ इत्यत्र पिबास्वरः । औहौहो३वा । नाकेसुपर्णमिति रहस्ये । पाहिनोअग्न इति द्वितीये द्वितास्वरः । औहौहो२३४वा । अग्निर्त्राणीति तृतीये । महिचीणा द्वितीये महीस्वरः । औहौहो२३४वा । पाहिनोअग्न इति द्वितीये । आविश्चन्निति द्वितीये । वृषापवस्व इति षष्ठे च । दृढ़ामग्न इत्यत्र यसास्वरः ॥ १० ॥

॥ इति तृतीयो दशकः ॥

औहोवा सख्युश्च । १

औहोवा स्तोभसमूहः सख्युस्वरो भवति ; चात् यसास्वरोऽपि । औहो२३४वा । उपत्वाजा द्वितीये । प्रोअयासीदिति चतुर्थे सख्युस्वरः ॥ १ ॥

औहोवाहा मधो पूष्णा । २

औहोवाहा स्तोभसमूहस्य मधोस्वरो पूष्णास्वरश्च भवति । औहो३४वाहाइ । त्वमग्नेरुद्र इति प्रथमे । योविश्वा इति तृतीये मधोस्वरः । औहोवाहा३४ । वृहद्वय इति द्वितीये । तरणिरिति द्वितीये च । परिप्रधन्वेति द्वितीये पूष्णास्वरः ॥ २ ॥

सम्राट्पत्यः । ३

औहोवाहा इत्यनुवर्तते । औहोवाहा स्तोभसमूहः सम्राट्स्वरो अपत्यस्वरो भवति । औहो । वाहायि । त्वमग्नेरुद्रपतिरिति तृतीये । पवस्वदद्य इति प्रथमे । अपत्यमित्यत्र अपत्यस्वरः ॥३॥

यन्ता वाजा । ४

औहोवाहा इत्यनुवर्तते । औहोवाहा स्तोभसमूहः यन्ताऽवरो वाजास्वरश्च भवति । औहोवा२३४हाउ । आदित्यव्रत इत्यत्र । अहमिद्धीत्यत्र च । प्रहोताजात इति द्वितीये यन्तास्वरः । औ३होवाहाउवा३ । द्वितीये अन्तरिक्षे । त्वामिद्धि प्रथमे । कस्तमिन्द्रेति प्रथमे द्वितीये च वाजास्वरः ॥ ४ ॥

आ दूता । ५

औहोवाहा इत्यनुवर्तते । औहोवाहा स्तोभसमूहः आकारपूर्वश्चेत् दूतास्वरो भवति । आऔहोवाहायि । यदिन्द्राह मित्यत्र । द्विरिडपदस्तोभे । अग्निन्दूतमिति दूतास्वरः ॥ ५ ॥

औहौहोवाहा । ६

आ दूता इत्यनुवर्तते । औहोहोवाहा स्तोभसमूहश्च आकारपूर्वश्चेत् दूतास्वरो भवति । आ । औहौहोवाहायि । अयंविचा इत्यत्र ॥ ६ ॥

अग्निमी । ७

औहौहोवाहा इत्यनुवर्तते । औहौहोवाहा स्तोभः अग्निमीस्वरो भवति । औहौहोवाहायि । जगद्भ्रात इति प्रथमे । अभित्यन्देवमित्यत्र । अग्निमीड़िष्वेत्यत्र अग्निमीस्वरः ॥ ७ ॥

हाउवै गवि । ८

हाउवै स्तोभसमूहो गविस्वरो भवति । हा२ऊवा२यि । यदिन्द्रना । मोषुत्वा द्वितीये । त्वण्ह्येहीति प्रथमे गविस्वरः ॥ ८ ॥

अय एहिया । ९

अयः स्तोभः एहियास्वरो भवति । इहायो२३४वा । त्वमिन्द्र-

बलादधीति द्वितीये । अयायो२३४५वा । सोमःपूषा इत्यत्र । अत्ते-दधामीति तृतीये । पञ्चनिधने वामदेव्ये एहियास्वरः ॥ ९ ॥

॥ इति चतुर्थो दशकः ॥

हाहावाहाहा रथ्यः । १

हाहा वाहा हा एते स्तोभाः रथीस्वरा भवन्ति । हाहा३१उ वा२३ । यद्यावइन्द्रेति अजोवैरूपे । पुनानःसो इति रहस्ये अङ्गिरसांव्रते । वाहा३१उवा२३ । उपप्रक्षे सान्नि । सुनीथोघा इत्यत्र च । हा३१उवा२३ । प्रसोमदेव इति पञ्चमे । अश्वीरथीति प्रथमे रथीस्वरः ॥ १ ॥

हौ सपौवा । २

हौ स्तोभः सपौवा स्वरो भवति । हौवाउ२३४वा । अङ्गिरसां व्रते । अष्टेड़पदस्तोभे । तन्वागोपेत्यत्र सपौवा स्वरः ॥ २ ॥

हाइ तृतीयः । ३

हाइ स्तोभः तृतीयस्वरो भवति । हाइ । अरिष्टे । अङ्गिरसां व्रते । अष्टेड़पदस्तोभे च ॥ ३ ॥

हए । ४

तृतीय इत्यनुवर्तते । हए स्तोभः तृतीयस्वरो भवति । हए२३४५ । प्रवोमहेसान्नि । विधुन्दद्रेति द्वितीये । उदुत्येमधु-मत्तम इति तृतीये । इन्द्रंविश्वा इति सप्तमे च ॥ ४ ॥

इत उत्तरस्थानानि षोड़ष सूत्राणि विलुप्तान्येव ॥ ५—२० ॥

॥ इति पञ्चम-षष्ठौ दशकौ ॥

इष्टारातिबृहा। १

वान्ता इत्यनुवर्तते। इष्टा राति बृहा एतेषु स्वरेषु वान्तानि
५ २ ४ ५
पर्वाणि भवन्ति। जोनपोवा। एनावोअग्निं चतुर्थे। इष्टाहोत्रा
१ २ १ २
इति इष्टास्वरः। रातिः कदोवा। शचीभिर्न इत्यत्र रातिस्वरः।
१ ऽ २
बृहा३उवा३। सोमएराजान मित्यत्र बृहास्वरः॥ १॥

यन्तानतोश्रूष्टाआस्तासहोमयो। २

वान्ता इत्यनुवर्तते। यन्ता नतो श्रूष्टा आस्ता सहो मयो
२ २
एतेषु स्वरेषु वान्तानि पर्वाणि भवन्ति। यन्ताउ। प्रहोताजा इति
५ ४ १ २
प्रथमे यन्तास्वरः। नतोवा। नतस्यमाययेत्यत्र नतोस्वरः। श्रूष्टा-
१ २ २
उवा। इन्द्रमच्छेति चतुर्थे श्रूष्टास्वरः। आस्ता३उवा। उद्वेदभीति
२ १ ५
द्वितीये आस्तास्वरः। सहो२३४वा। अग्निंव इति प्रथमे सहो-
४ ५
स्वरः। मयोवा। आतेवस्र इति प्रथमे मयोस्वरः॥ २॥

मदाऽनीगृणीसत्या। ३

वान्ता इत्यनुवर्तते। मदा आनी गृणी सत्या एतेषु
२
स्वरेषु वान्तानि पर्वाणि भवन्ति। हिरा३१उवा२३। पुनानः सो
२
मष्टमे। रया३१उवा२३। सोमउष्वाण इति पञ्चमे। एतमुत्य-
२
मिति द्वितीये मदास्वरः। हा३१उवा२३। इलान्दे द्वतीयेऽनु-
४ ५
गाने। अगन्महचेत्यत्र आनीस्वरः। भगाप्रया उ। वा। परिप्रध-
४ ५
न्वेति पञ्चमे। दधाप्रनाउ। वा। तन्तेमदमिति प्रथमे गृणी-

स्वरः । सत्यइन्दुःसत्या५मिन्द्राउ । वा । त्रिकद्रुकेष्वित्यत्र सत्यास्वरः ॥ ३ ॥

उग्रम्मेतोवारा । ४

वान्ता इत्यनुवर्तते । उग्रं मेतो वारा एतेषु स्वरेषु वान्तानि पर्वाणि भवन्ति । द्रवाससा३१वाये३ । श्रीर्वभृगुवदिति प्रथमे । उच्चा आमहीयवे उग्रं स्वरः । आरत्न । धाउवा२३ । पुनानः-सोमेति षष्ठे । रयिम । षाउवा२३ । अभिनोवा इति द्वितीये । समेतविश्वा इति प्रथमे मेतोस्वरः । नवानवो२३४वा । तंवोदस्र इति चतुर्थे । इहो२३४वा । इमाउत्वापुरूवसोगिर इति द्वितीये । अश्वन्नत्वा इति तृतीये वारास्वर इत्युक्तम् ॥ ४ ॥

वाश्रीवान्ता । ५

वारा इत्यनुवर्तते । वारास्वरेण वाउवान्तानि पर्वाणि भवन्ति । सपीवाउ२३४वा । कीवाउ२३५वा । तन्त्वागोपवन इत्यत्र । विकीवाउ२३४वा । अभिद्युम्नमिति द्वितीये ॥ ५ ॥

मह्रीवान्ता । ६

चकारात् वाउवान्ता इत्यनुवर्तते । महीस्वरेण वाउवान्तानि उवान्तानि च पर्वाणि भवन्ति । हत्नीवाउ२३४वा । वृभ्रो-वाउ२३४वा । त्वंहत्य इत्यत्र । विपा । गिरीवाउ२३४वा । यदा-कदा इति तृतीये । उवान्तानि उच्यन्ते । आनः । भराउ२३४५वा । सुष्वाणास इति प्रथमे । यताउ२३४वा । तंवःसखा इति द्वितीये महिन्नीणा प्रथमे मह्रीस्वरः ॥ ६ ॥

पासा । ७

वाउवान्ता उवान्ता इति चानुवर्तते । पासास्वरे वाउवान्तानि उवान्तानि च पर्वाणि भवन्ति । २ १ ५
वा३उ२३४वा । तरणिरिति द्वितीये । अपामीवामपेत्यत्र च । १ २ १ ५
यःका३उ३३४वा । २ १ ५
प्रमन्दिनेत्यत्र । स्त३उ२३४वा । मनोहणीथा इति प्रथमे । उद्वेदभीति तृतीये पासास्वरः ॥ ७ ॥

प्रह्व । ८

वाउवान्ता उवान्ता इति चानुवर्तते । प्रह्वस्वरे वाउवान्तानि उवान्तानि च पर्वाणि भवन्ति । १ २ ३ ५
पायौवाउ२३४वा । अग्नेजरित इति प्रथमे । १ २ ३ ५
यारौवाउ२३४वा । यदिन्द्रया इति प्रथमे । १ २ ३ ५
वाज्रौवाउ२३४वा । पुराग्निन्दुरित्यत्र । १ २३ ५
याण्साउ२३४वा । अग्निस्तिग्मेनेति प्रथमे । प्रतित्यञ्चारुमित्यत्र प्रह्वस्वरः ॥ ८ ॥

हान्ता च । ९

प्रह्व इत्यनुवर्तते । प्रह्वस्वरे हान्तानि च पर्वाणि भवन्ति । १ ३ ५
सत्यो३३४हा । अभिप्रगो इति प्रथमे । १ ३ ५
गच्छो२३४हा । सुतासोमा इति चतुर्थे ॥ ९ ॥

वारायसात्वोता । १०

हान्ता इत्यनुवर्तते । वारा यसा त्वोता एतेषु स्वरेषु च हान्तानि पर्वाणि भवन्ति । २ ३ ५
अच्छानग्नो२३४हायि । अग्निंवोवृधन्तमिति तृतीये वारास्वरे । अखन्नला तृतीये वारास्वरः । ३ ५
णमो२३४हायि । पुरुत्वा द्वितीये यसास्वरे । इड़ामग्न इत्यत्र यसास्वरः । १ ५
नावा२३हा

३४३यि । प्रेष्ठंव इति प्रथमे त्वोतास्वरे । योनोवनुष्यन्नित्यत्र त्वोतास्वरः ॥ १० ॥

॥ इति सप्तमो दशकः ॥

जङ्गादार्शाजारा । १

हान्ता इत्यनुवर्तते । जङ्गा दार्शा जारा एतेषु स्वरेषु च हान्तानि पर्वाणि भवन्ति । ऊग्रा३ण्हायि । उच्चातेजातमिति षष्ठे जङ्गास्वरे । अग्निष्ठत्रा द्वितीये जङ्गास्वरः । स्तू२३४षेहाहि । विशोविशीये दार्शास्वरे । उदुत्यमित्यत्र दार्शास्वरः । अग्नेहाउ । अग्नउजिष्ठमित्यत्र जारास्वरे । जराबोध इति प्रथमे जारास्वरः ॥१

दिगिष्टादित् । २

हान्ता इत्यनुवर्तते । दिक् इष्टा आदित् एतेषु स्वरेषु च हान्तानि पर्वाणि भवन्ति । दिक्शब्देन चतुर्थीचं ग्राह्यम् । चतुर्थ-स्वरपर्यन्त मुच्चस्वरो यस्य तच्चतुर्थीच्चम्यर्व । प्रसंस्राजोहायि । दिक्स्वरे । अयण्सहोहायि । इष्टास्वरे । इष्टाहोत्रा इत्यत्र इष्टा-स्वरः । विश्वोहायि । आदित्सूरे । आदित्यत्रस्येत्यादित्सूरः ॥ २ ॥

दायोसूगोहोतो । ३

हान्ता इत्यनुवर्तते । दायो सूगो होतो एतेषु स्वरेषु च हान्तानि पर्वाणि भवन्ति । दा२३४योहायि । प्रेष्ठंव इति प्रथमे । सू२३४गोहायि । अपतंग्रहजिनमित्यत्र । होऽतोहायि । अग्निर्वाणीति तृतीये ॥ ३ ॥

दूता । ४

हान्ता इत्यनुवर्त्तते। दूताक्षरे च हान्तानि पर्वाणि भवन्ति।

५र र र ५रर र र ५ र र र
योविश्वादयतेवसुहाउ। एनावोअग्निनमसाहाउ। यदाकदाच-
मात्राउ। अग्निन्दूतमितयत्र दूताक्षर इत्युक्तम् ॥ ४ ॥

औहोऽचु । ५

दूता इत्यनुवर्तते। अचुशब्देन आदिः। दूताक्षरे औहो-
५र र
आदीनि च पर्वाणि भवन्ति। औहोइविश्वस्या। औहोइपरी-
तोषि ॥ ५ ॥

हा । ६

दूता अचु चानुवर्त्तते। दूताक्षरे हादीनि च पर्वाणि भवन्ति।

५र २१ २ ५र २१र ५र
हाउत्वमिन्द्रा। बलादधि। हाउत्वमिन्द्रा। यज्ञाः। हाउवय-
५र र ५र र
मिन्द्रा। हाउतमूवभी। अन्तरिक्षे। हाउपिबासुता। देवस्कानि
५र र
च। वार्षाक्षरे। हाउत्वमेतात् ॥ ६ ॥

होवाइ । ७

दूता अचु चात्यनुवर्त्तते। दूताक्षरे होवाइ आदीनि च पर्वाणि

५र र र ५र
भवन्ति। होवाइकयानश्ची। होत्वमिन्द्रा ॥ ७ ॥

याऽन् । ८

दूता इत्यनुवर्तते। अन्शब्देन च अन्तः कथ्यत इति बोधित
मेव पुरस्तात्। तथाच 'यान्' यान्तं पर्व इत्यर्थः। दूताक्षरे
५र र ५ र
यान्तानि च पर्वाणि भवन्ति। त्वन्नोया। यदिन्द्रोया ॥ ८ ॥

एऽन् । ९

दूता इत्यनुवर्तते। 'ए' एकारः 'अन्' अन्तो यस्य, तत्

एकारान्तं पर्व इत्यर्थः । दूतास्वरे एऽन्तानि च पर्वाणि भवन्ति ।

५ ५ ५ ५ ५र ५ ५ ५
अग्निंवाइए । अवद्रसाइए । साकमुचाइए । चित्राइए ॥ ९ ॥

रण । १०

एन् इत्यनुवर्तते । रणस्वरेऽपि एऽन्तानि पर्वाणि भवन्ति ।

४र ४
उवाऽए । धर्तादिव इति प्रथमे । अचिक्रदाऽए । अचिक्रददिति साग्नि । त्वऽहत्यदिति द्वितीये रणस्वरः ॥ १० ॥

॥ इति अष्टमो दशकः ॥

आराता । १

एन् इत्यनुवर्तते । आरातास्वरेऽपि एऽन्तानि पर्वाणि भवन्ति ।

१ २र १ २ १
मनए । पवस्वदेववीतय इति प्रथमे । रहस्थे होवाहायि । योन

१ २ १ २
इत्यत्र । इदामे । पुराए । त्वन्नोअग्न इति द्वितीये आराता स्वरः ॥ १ ॥

आत्वासहा । २

एन् इत्यनुवर्तते । आत्वासहास्वरेच एऽन्तानि पर्वाणि भवन्ति ।

३ ४ र ५ ५
हरसाहराइए । प्रत्यग्नेहरसा इति साग्नि । आत्वासहस्रमाशत मिति द्वतीये आत्वासहास्वरः ॥ २ ॥

नन्दा । ३

एन् इत्यनुवर्तते । नन्दास्वरे च एऽन्तानि पर्वाणि भवन्ति ।

२ १ १ १ १ १
ससा३मे२३४५ । और्वभृगुवदिति द्वितीये । मूर्द्धानमिति प्रथमे नन्दास्वर इतुक्तम् ॥ ३ ॥

ङ्ऽन् । ४

नन्दा इत्यनुवर्तते । ङ्ऽन्शब्देन इकारान्तं पर्व बुध्यते । नन्दा-

स्वरे इ-अन्तानिच पर्वाणि भवन्ति । द्यवि२ई२३४५ । सुरूपकृत्नु मिति तृतीये ॥ ४ ॥

होऽन् । ५

नन्दा इत्यनुवर्तते । होऽन्शब्देन होशब्दान्तं पर्व बुध्यते । नन्दास्वरे होऽन्तानि च पर्वाणि भवन्ति । औहोइहुवा३होयि । तमिन्द्रंवाजयामसीति चतुर्थे । होयि । हो । हा३होयि । तिस्रोवाच इति प्रथमे । सहमैहै३हो२ । प्रसंन्त्राजमिति चतुर्थे ॥ ५ ॥

इरा । ६

होन् इत्यनुवर्तते । इरास्वरे च होऽन्तानि पर्वाणि भवन्ति । एषब्रह्मौहो । एषब्रह्मा य इति पञ्चमे । ब्राह्मणादिन्द्रराधस इतत्र इरास्वरः ॥ ६ ॥

वृणोदेद्याया । ७

होन् इत्यनुवर्तते । वृणो देदि आया, एतेषु स्वरेषु च होऽतानि पर्वाणि भवंति । अद्याहोयि । अग्नेविवस्वदुषस इति प्रथमे । अग्निन्दूतमितत्र वृणोस्वरः । मर्ता२हो । प्रातरग्निरितत्र । उपत्वाजा इति द्वितीये देदिस्वरः । सानौ२ए होयि । इममूषु-त्वमितत्र । समू२हो१ । इदंविष्णुरितत्र । परिप्रियादित्र इति प्रथमे आयास्वरः ॥ ७ ॥

योनिदुषे । ८

होन् इतत्रनुवर्तते । योनि-दुषेस्वरयोश्च होऽन्तानि पर्वाणि

२ ३ २ १ १ ३ २ १
भवन्ति । यत्रौहोयि सोमानंस्वरणमित्यत्र । वहन्तु सोमपौहोइ ।
आत्वासहस्रमिति द्वतीये । योनिष्टइन्द्रेति द्वितीये योनि-
२ १ — २ १ —
स्वरः । हषाहो२ । तन्त्वेमदमिति द्वितीये । सिञ्चाहो२इ ।
एदुमधोरिति द्वितीये । प्रतारम्मै द्वितीये दुषेस्वरः ॥ ८ ॥

परिब्रुवाणाइन्द्रा । ९

होन् इत्यनुवर्तते । परि, ब्रुवाणा, आइन्द्रा, एतेषु स्वरेषु च
३ २ २
होऽन्तानि पर्वाणि भवन्ति । हाहोयि । परिस्वान इति षष्ठे ।
२ १ ऽ २
सपौ३हो । शुधीहवमिति प्रथमे । प्रकाव्यमिति प्रथमे ब्रुवाणा
१ २ २ ऽ २ १ ऽ २
स्वरः । त्वायुजावनौ३हो । मानइन्द्रा द्वितीये । संस्त्रौ३हो ।
१ २ ऽ २
उभेयदिन्द्रेति साम्नि । आश्वौ३हो । सोमश्चाण इति प्रथमे ।
स्यादिष्ठयेति संहिते आइन्द्रास्वरः ॥ ९ ॥

अभिवातद्विषणी । १०

होनित्यनुवर्त्तते । अभिवा, तद्वि, षणि, एतेषु स्वरेषु च
२ २
होन्तानि पर्वाणि भवन्ति । जतिहो२३४५इड़ा । इन्द्रोविश्वस्येति
२ १ २ १
प्रथमे । परिकोशमित्यत्र अभिवास्वरः । तोदस्येवशरणआ२३हो
इ । धियाशविष्ठआ२३होयि । उभयञ्शृणवदित्यत्र । जराबोध
— १ २ — १
इति प्रथमे तद्विस्वरः । अभौ२होयि । रयौ३ञ्होयि । अभिनो-
वाज इति द्वतीये । पान्तमिति द्वितीये षणीस्वरः ॥ १० ॥

॥ इति नवमो दशकः ॥

ओऽन् । १

'ओऽन्' ओकारान्तं पर्व ; अभिवातद्विषाणीतश्चानुवर्तते । एतेषु स्वरेषु ओऽन्तानि च पर्वाणि भवन्ति । पिभिरो२३४५यि । ङा । इन्द्रनेदीय इति द्वितीये । जियमो२३४५यि । ङा । इत्याद्विवो प्रथमे अभिवास्वरे । दुहमोयि । एतमुतश्चमिति षष्ठे तद्विस्वरे । ददा२ओ । इन्द्रद्विषेददा इति द्वितीये । देवेभ्यःपीतया२ओयि । पवस्वदद्य इति द्वितीये षणीस्वरे ॥ १ ॥

शतावाद्वश्ये । २

ओऽन् इतश्चानुवर्तते । शता-वाद्वश्ययोश्च स्वरयोः ओऽन्वानि पर्वाणि भवन्ति । ना । रमोयि । नृ । षाहमो२यि । प्रसंस्राज-मिति द्वितीये । तवत्यश्चर्यमितश्च शतास्वर इत्युक्तम् । समु ओ । भोर्वभ्रुवदिति प्रथमे । हार्दा२ ओयि । अग्नेतमद्येति द्वितीये । विश्वावसूनिवा२ । ओये२ । एतमुतश्च मिति षष्ठे । नित्वानक्ष इतश्च वाद्वश्यास्वरः ॥ २ ॥

आऽन् । ३

'आऽन्' आकारान्तं पर्व । वाद्वश्ये इतश्चानुवर्तते । वाद्वश्यस्वरे आन्तानि च पर्वाणि भवन्ति । स्वादोरेद्त्याएविषूएवतश्चा । शाक्वरऋषभे ॥ ३ ॥

आन्धाहएसिदिक् । ४

आनितश्चानुवर्तते । आन्धा, हएसि, दिक्, एतेषु स्वरेषु च आन्धानि पर्वाणि भवन्ति । दिक्शब्देन चतुर्थीच्चं पर्वेत्युक्तम् ।

१ २ २ २ ३ २
दिवया । हिः । असाविदेवमित्यत्र आन्धारुवरः । सुतआ ।
२ ३ २ २३२ २
ध्वरआ । शुधिशुल्कर्ण इत्यत्र । मदआ । सुतासोम इति प्रथमे ।
४२५२ ४ ५ ४२५ ४
त्वमिन्द्रयशाअसि प्रथमे हण्सिरुवरः । आत्वासहस्रमाशतमा ।
दिक्सुरे ॥ ४

अता । ५

आन् इत्यनुवर्तते । अतास्वरे च आन्तानि पर्वाणि
१ ऽ १ ऽ २
भवन्ति । मासी३या । नकिदेवा इत्यत्र । र्यतो३या । शुधीहव
१ ऽ २ १ ऽ २
मिति प्रथमे । वचो३आ । प्रमित्राय इति तृतीये । हिषा३आ ।
ब्रह्मजज्ञानमिति द्वितीये । प्रेष्ठंव इति प्रथमे अतास्वरः ॥ ५ ॥

इचुनुयेऽन् । ६

'इचु' इकारादिः ; नुशब्देन क्रुष्टः ; ये इति स्तोभसंरूपम् ;
अनशब्देन अन्तः । अता आन् इति चानुवर्तते । अतास्वरे
इकारादिः ये-स्तोभो तृतीयक्रुष्टः आन्तश्च भवति ; आतास्वरे
१ २ २ —
'इऽ३या' स्तोभः श्रूयत इति यावत् । इन्द्रोद्यौचोअस्यभिरिया
१ ऽ २ २ १२ — ऽ २
२इ३या । महेतुनइया२ई३या । प्रनइन्द्रो इति द्वितीये ॥ ६ ॥

एह्यौ । ७

अता, नु, आन् अनुवर्तन्ते । अतास्वरे एहिस्तोभौ तृतीय-
१२ — १ — ऽ २ २२१
क्रुष्टौ आन्तौ च भवतः । आयुषागै२हौऐ२हौ३या । क्रमिन्न-
— ऽ २
विभ्रदुषसऐ२हौऐ२हौ३वा । पवस्वदेवआयुषगिति द्वितीये ।
प्रनइन्द्रो प्रथमे च । ७ ॥

णीप्रे । ८

एह्यो आन् च अनुवर्त्तते । णीप्रस्वरे च एहिस्तोभौ आन्तौ
३ ४ ५ २ २ २ ३ ५
भवतः । पवस्वदेवऐ । हीऐहो२३४या । प्रनइन्दो प्रथमे च ।
प्रवोमहे इत्यत्र णीप्रस्वरः ॥ ८ ॥

आन्याउवान् । ९

१ २
आनीस्वरे आउवान्तं पर्व भवति । दुह्यया३१उवा२३ ।
२ १ २
सुरूपकृत्नु मिति प्रथमे । हिन्वन्नार्तस्यदा३१उवाये३ । प्राणा-
शिशुरिति द्वितीये ॥ ९ ॥

तयोह्वा होऽन् । १०

तयास्वरे उह्वा स्तोभसमूहो होऽन्तपर्वको भवति ।
२ २ १ २ २ १
आशुञ्जेतारऽएहाइतार सुह्वा२३हो । इतऊतीव इति द्वितीये ।
२ १ २ २ २ १
अऽएशुर्मदायास्मदचोगिरिष्ठा उह्वा२३होयि । असाव्यऽएशुरिति
पञ्चमे । अग्नआयाहो द्वितीये तयास्वरः ॥ १० ॥

॥ इति दशमो दशकः ॥

उवा हो न् । १

तया इत्यनुवर्तते । तयास्वरे विद्यमान उवा स्तोभश्च
१ १
होन्तपर्वको भवति । उवा२३होयि । परिस्वान इति पञ्चमे ।
२ १ २ २ १
सुतायमादयिन्नवउवा२३होयि । पुरोजितो चतुर्थे ॥ १ ॥

वाहोवाहाचु नु यान् । २

'अचु' आदिः ; 'नु' कृष्टः ; 'यान्' यान्तः । तयास्वरे विद्यमानो
१२
वाहोवाहा स्तोभसमूहः तृतीयकृष्टो यान्तपर्वको भवति । नाम-
२ १ — १
त्वष्टुरपीच्यामियाउवा२३होवा२३हा२ईया । अच्छागोरिति
१२ २ २ १ — १
द्वितीये । गोमांयदिन्द्रतेसखाउवा२३होवा२३हा२ईया । अखि-

१ र र १ — १
रथौ द्वितीये । मदायबर्हणागिराउवा२२होवा२२हा२ईया ।
परिस्खान इति द्वितीये ॥ २ ॥

औहोऽचु दूते । ३

'अचु' आदिः ; दूताक्षरे औहो-आदीनि पर्वाणि भवन्ति ।
३र ४ र ४ ३र ४ र ४
औहो५इन्द्रतेशवाः । गृणेतदिन्द्र इति द्वितीये । औहो५स आय-
वाः । अभिसोमास इति चतुर्थे ॥ ३ ॥

चित्रा । ४

अचु इत्यनुवर्तते । चित्राक्षरे च औहो-आदीनि पर्वाणि
५र र र र ५ २र र र र
भवन्ति । औहोआत्वासहा६ए । रहस्ये औहोइन्द्रज्येष्ठआभरा
२ २र र र र २ २र र र १
६ए । औहोइत्वामिद्धिहवामहा३ए । औहोइत्वमिन्द्रप्रतूर्तिषू३ए ।
चित्रइच्छिशोरिति द्वितीये चित्राक्षरः ॥ ४ ॥

सस्वरिक् । ५

चित्रा इत्यनुवर्तते । 'सस्व'-शब्देन स्वरवर्णः ; रिक्शब्देन
अभ्यासः । चित्राक्षरे विद्यमानः स्वरवर्णात्स्तोभोऽभ्यस्तीसूत एव
५ र ५र र र
पर्वान्तो भवति । अरन्तइन्द्रश्रवसेए । ए । परीतोषिञ्चता-
सुतए । ए ॥ ५ ॥

हाचु वसुः । ६

चित्रा इत्यनुवर्तते । 'अचु' आदिः ; 'वसुः' अष्ट ; चित्राक्षरे
विद्यमानानि अष्टाचराणि पर्वाणि हादीनि भवन्ति ।
५र र ५र र र ५र र
हाउत्वमित्प्रथाअसिहाउ । हाउश्रुष्टाग्नेनवस्यमेहाउ । हाउ-
र र र
देवानामिद्वोमहवाउ ॥ ६ ॥

जारा । ७

हाचु इत्यनुवर्तते । जाराक्षरे च हादीनि पर्वाणि भवन्ति ।
४ ५
हावात्रा इत्यादीनि ॥ ७ ॥

ए। ८

जारा इति, अनु इति चानुवर्तते। जाराक्षरे एकारादीनि
४ ५ ४ ५ १ २ १ २
च पर्वाणि भवन्ति। ए काया। ए गावाः। ए आसा। ए ऊचा।
१ २ १ २
ए आया। ए स्वादोः। इत्येवमादीनि द्रष्टव्यानि ॥ ८ ॥

होऽन्तत्रतीयोऽग्ने। ९

अग्नेक्षरे 'अन्तत्रतीयः' पर्वान्ततो गणनया त्रतीयो होक्षोभो
५ र ४ ५र ४र ४ ४ ५ र ५र र ४
भवति। पुनानःसोमधा। हो५रया। अभिसोमासआ। हो५
४ ४ ५र ४ ५र र ४ ४
यवाः। तवाहऽसोमरौ। हो५रणा। अग्नेजरित इति प्रथमे
अग्नेक्षरः ॥ ९ ॥

हेष्टा। १०

अन्तत्रतीय इत्यनुवर्त्तते। इष्टाक्षरे अन्तत्रतीयो हाक्षोभो
५ र र र र र ४ ५ ५ र र र र र र ४ ५
भवति। देवा नामिद्वोहाउमाहात्। योगियोगितवाहाउक्षाराम्।
५ र र र ५ ५ र र र र ४ ५
महाहाइन्द्राः। आनोविश्वासुहाहाव्याम्। इष्टाहोत्राः इष्टाक्षरः॥१०

॥ इति एकादशो दशकः ॥

औहोवाहान् दे। १

इष्टा इत्यनुवर्तते। इष्टाक्षरे 'दे' एकस्मिन् पदे परे औहोवा-
५ र र र र ४ ५ ५ र र र
हान्तानि पर्वाणि भवंति। पर्यौहोवाहाइक्षानाः। अभ्यौहोवा-
र ४ र ५ ५ र ष र र ४ ५
हाप्रियाणी। इन्दुरौहोवाहाइया ॥ १ ॥

होवान्। २

इष्टा इत्यनुवर्तते। इष्टाक्षरे होवांतानि च पर्वाणि भवंति।
५ र ४ ५ ५ र र ४ ५ ५ र ४ ५
तद्वौहोवा। प्रमित्रायप्रौहोवा। अचौहोवा ॥ २ ॥

ईयान्। ३

इष्टा इत्यनुवर्तते। इष्टाक्षरे ईयांतानि च पर्वाणि भवंति।
५ ४ ५ ५र र ४ ५
अग्नईया। पावकानईया ॥ ३ ॥

औहोहान् । ४

इष्टा इत्यनुवर्तते । इष्टाक्षरे औहोहांतानि च पर्वाणि भवन्ति ।

५ र र ४ ५ ५ र ४ ५ ५ ४ ५ २ र १ २
अग्नन्नत्वाऽऔहोहायि । औहोहा५यि । अयोहायि । औहोहा-

यि । यक्षे ॥ ४ ॥

ओहान् । ५

इष्टा इत्यनुवर्तते । इष्टाक्षरे ओहांतानि च पर्वाणि भवंति ।

५ र ४ ५ २ र र र १ २
माचिदन्यद्ओहायि । रहस्ये । इमाउवान्दिविष्टयाओहाउ ॥ ५ ॥

होहान् । ६

इष्टा इत्यनुवर्तते । इष्टाक्षरे होहांतानि च पर्वाणि भवंति ।

५ र र ४ ५ २ र र र १
उपनोहाहोहा । रहस्ये । इमाउवान्दिविष्टयाहोहाउ ॥ ६ ॥

एना । ७

होहानित्यनुवर्तते । एनाक्षरे च होहांतानि पर्वाणि भवन्ति ।

५ र ४ ५ ५ र र र र ४ ५
मूर्द्धोहोहायि । अग्नेवाजस्यगोमतोहोहायि । एनावो अग्नि-

मिति प्रथमे एनाक्षरः ॥ ७ ॥

औहोहोहान् । ८

एना इत्यनुवर्तते । एनाक्षरे औहोहोहांतानि च पर्वाणि

५ र र ४ ५ ५ र र र ४ ५
भवंति । अग्निरुक्थाऽऔहोहोहायि । सखायस्त्वा ओहोहोहाइ ।

५ र र ४ ५ ५ र र ४ ५ ५ र र ४ ५
वृषाऽऔहोहोहायि । धर्त्ताऽऔहोहोहायि । यक्षाऽऔहोहोहायि ।

५ र र र ४ ५
भ्राजाऽऔहोहोहायि । इलान्दे ॥ ८ ॥

ईया औहोवाहान् । ९

३ २ ३ ४
ईयाक्षरे औहोवाहांतानि पर्वाणि भवंति । अग्निरौहोवा

५ ३ २ ३ र ४ ५ ३ २ ३ र ४ ५
हायि । इन्दुरौहोवाहायि । वयामौहोवाहायि । अग्नेयजिष्ठ इति

द्वितीये ईयाक्षरः ॥ ९ ॥

औहोवान् । १०

ईर्या इत्यनुवर्तते । ईयास्वरे औहोवांतानि च पर्वाणि भवन्ति ।

५ ४ ५र ३ २ ३र ४र ५
अग्निमीड़िष्वा३४औहोवा ॥ १० ॥

॥ इति द्वादशो दशकः ॥

ध्वरात्सिवापूष्णार्ध्या । १

औहोवानित्यनुवर्तते । ध्वरा, त्सिवा, पूष्णा, ऋध्या, एतेषु

१ ७ २ ३र ४र ५
स्वरेषु च औहोवान्तानि पर्वाणि भवंति । तांमध्वरा३४ औहोवा ।

१ ३ ५र र
अश्वन्नत्वा त्वतीये । त्सा२यिबा२३४ औहोवा । अग्नआयाह्वीति

३र १ ५र र २ १ ३
प्रथमे । पूष्णा३४औहोवा । परिप्रधन्वेति द्वितीये । ऋध्या२मा-

५र र
२३४औहोवा । अग्नेतमद्येति प्रथमे ॥ १ ॥

वारा । २

औहोवानित्यनुवर्तते । वारास्वरेऽपि औहोवांतानि पर्वाणि

२ १ ५र र २ ३
भवन्ति । जासा२३४औहोवा । यौक्षाय्ये । णमधिगो२३४

५र र
औहोवा । गोमन्न इत्यत्र । अश्वन्नत्वा त्वतीये वारास्वर इत्युक्तम् ॥२

आयावाचु । ३

वारा इति, औहोवानिति चानुवर्तते । 'अचु' आदिः ;
वारास्वरे आ-या-वा-आदीनि च औहोवांतानि पर्वाणि भवंति ।

३ ५र र
आ२३४औहावा रहस्ये ई२संतेपयांसीति साग्नि रथादीनि ।

३ ५र र ३ ५र र
या२३४औहोवा । एकाया इत्यत्र । वा२३४औहोवा । अग्नेदेवो

रिति द्वितीये ॥ ३ ॥

ओ । ४ [illegible] ॥

वारा अनु वानुवर्त्तंते । वारास्वरे ऽकारादीनि च पर्वाणि भवंति । ऽइगा२३४वाः । ऽइस्वा२३४दौ ॥ ४ ॥

ताइवसूमागाऽग्नाइमृडा । ५

ऽ अनु वानुवर्त्तंते । ताइवसू, मागा, अग्नाइमृडा, एतेषु स्वरेषु च ऽकारादीनि पर्वाणि भवंति । ऽइत्विक । ऽइप्रतु । जगद्भात प्रथमे ताइवसूस्वरः । ऽइययू२ः । उपत्वाजा प्रथमे मागास्वरः । ऽयि । चमा२३ । वृषापवस्वेति यौक्ताद्ये । अग्नेमृड इति अग्नाइमृड़ास्वरः ॥ ५ ॥

होतोतचद् । ६

ऽ अनु वानुवर्त्तंते । होता, ऽतद्विषा, चदद्यसा, एतेषु स्वरेषु च ऽकारादीनि पर्वाणि भवंति । ऽइवियख्या२३द्रो । अयम्षा इति द्वितीये । ऽयि । पुष्येमरयिम्भीमहेतआ२३इन्द्रा । उपप्रक्षेमधुमतीत्यत्र । अग्निन्दूतमित्यत्र होतास्वरः । ऽइवहंता आ१शावा२ । यदीवहंतीत्यत्र । ऽनवंत आदू१हाः । अभीनवन्त इति तृतीये । त्वन्नोअग्नइति प्रथमे ऽतद्विषास्वरः । ऽमघोना२म् । प्रसोमासोमदच्युत इत्यत्र । यन्नायन्ना तृतीये चदद्यसास्वरः ॥ ६ ॥

इत उत्तरस्थानान्यपि चत्वारि सूत्राणि विलुप्तान्येव ॥ ७—१० ॥

॥ इति महामुन्यापिशलिप्रोक्तमक्षरतन्त्रं सम्पूर्णम् ॥

॥ इति श्रीसत्यव्रतसामश्रमि भट्टाचार्यकृता वृत्तिपूर्त्तिश्च समाप्ता ॥